नं० ४३३६-घ

4337 MISSING

F 734

पुराणदीपिकाव्याख्या प्रभा नवमाध्यायः

नं० ४३३७-घ

रा॰ऊ॰
१

॥ ॥ श्रीमहागणपतये नमः ॥ ॥ यत्कर्म प्रधानं तदुद्देशेनाम्नातं तत्स्वरूपद्रव्येषु संस्कारस्तत्र प्रयुक्तस्तदर्थत्वात् ॥ ॥ संगतिं दर्शयन्नूहचिंतनं प्रतिजानीते । सिद्ध इति । मंत्रे अग्नये जुष्टं निर्वपामीत्यादिः साम रथंतरादिः संस्कारः प्रोक्षणादिः । साम्नो मंत्रसंस्कारात्मकत्वेपि वक्ष्यमाणसामोहस्योभयविलक्षणत्वात्पृथगुक्तिः । ऊहलक्षणमाह द्वारान्तरेति । द्वारं च प्रकाश्यमभिव्यंग्यं संस्कार्यं च क्रमेण ज्ञेयं । तथा च यस्य पदार्थस्योपदेशातो यत्र द्वारत्वेनावगतं तस्य तद्भिन्नद्वारसंबंधप्रयुक्तोन्यथाभाव ऊह इति लक्षणं । मंत्राणां द्वारत्वेनावगताग्न्यादिभिन्नसूर्यादिद्वारसंबंधात्सूर्यादिपदघटितत्वरूपान्यथाभावः । प्रोक्षणादीनां च द्वारत्वेनावगतव्रीहियवभिन्ननीवारादिद्वारसंबंधादन्यथाभावः कर्मकारकभेदेन तन्निरूपणीयक्रियावैलक्षण्यापातः । साम्नामपि यत्स्थानगताक्षराभिव्यंग्यत्वेनावगतं तदन्यस्थानगताक्षराभिव्यंग्यत्वेनान्यथाभाव इति लक्षणार्थः । अन्यपः प्रकृतौ यवानां माहशव्रीहिभिन्नत्वेपि तेषामपि द्वारत्वेनावगतत्वान्न तादृशावगतत्वावच्छिन्नभेद इति नातिप्रसंगः । प्रतिनिधित्वेनोपात्तानां नीवाराणां तादृशभेदवत्त्वेपि तत्र व्रीह्यवयवानां द्वारत्वावगमान्न तादृशभेदवत्त्वमिति तत्संबंधप्रयुक्तत्वाभावान्नातिप्रसंगः । व्रीहिद्रव्यकविकृतौ तादृशभेदवत्तस्य व्रीहित्वस्योपगमेपि तत्संबंधादेवघातस्य नान्यथाभाव इति तत्रापि नातिप्रसंग इति दिक् ॥ अन्ये तु ॥ येन संबंधेन यद्धर्मावच्छिन्नद्वारत्वं यस्य प्रकृतौ क्लृप्तं तस्य तेन संबंधेन वि

राम
१

कृतौ तद्धर्मावच्छिन्नमित्रहविष्ट्वमपूर्वः प्रोक्षणादेर्हि व्रीहित्वावच्छिन्नहविष्ट्वं संस्कारकतया प्रकृतेऽपेक्षितं वि
कृतौ तु तद्भिन्ननीवारादिहविष्ट्वं तथा मन्त्राणां स्मारकतयाग्न्यादिहविष्ट्वं प्रकृतौ तद्भिन्नसूर्यादिहविष्ट्वं एवं
सामग्रापपरीत्य लक्षणासमन्वय इमाऽऽहुः अत्रेदं [illegible] चार्थते परे पशुं नियुञ्जीतेति प्रकृतौ नियोजनस्य यूपवत्त्वे
अकृते विकृतौ तु तद्भिन्नपरिधिवृत्तित्वं परिधौ पशुं नियुञ्जीतेति वचनादिति तत्रोहलक्षणातिव्याप्तिः अथ
यद्धर्मावच्छिन्नद्वारहविष्ट्वमिति वाच्यं यूपादित्वेनाभियोजनादेर्द्वारमिति नातिप्रसङ्ग इच्छायां तेन तथा सति देवस्य त्वेति मन्त्र
स्याग्निहविष्ट्वं संस्कृतमिति स्वोक्तिविरोधः आग्नेयनिर्वापस्यैव द्वारत्वेनाग्नेस्तथात्वात् विकृतावग्नित्वावच्छिन्नभिन्ना
ग्नेयनिर्वापवृत्तित्वादूहलक्षणातिप्रसङ्गश्चेति संक्षेपः पौनरुक्त्यपरिहाराय आह अतिदेशाधीनत्वमिति कार्यमुप
कारः तदीयावितिः धर्मविधावुद्दिश्यमानस्य यागस्य दर्शपूर्णमाससंज्ञया विशेषणाद्योगाः सर्वयागार्थतयैवोप
देश इति पूर्वपक्षः करणेतिकर्तव्यताविशिष्टपूर्वभावनाविधौ पार्ष्ठिकान्वयदशायां तद्भावनाकरणत एवं तदितिकर्त
व्यतावगमात्कर्मान्तरेतिदेशाय वेति च सिद्धान्तस्तत्रैवोक्त इमर्थं भाष्यकारीयवर्णकान्तरं दर्शयति तथेति अवघात
स्य मन्त्रस्य आदिना सामान्योक्तः व्रीहीति व्रीहित्वादिविशिष्टस्वरूपं स्वरूपे व्रीहित्वादिसाधनविशेषेति तण्डुलनिर्वृत्तिप्रणा
डिकापूर्वसाधनेत्यर्थः नीवारादावपि सिध्यत्यत इदमन्वयः साधनेत्यादिहेतुः दार्शपौर्णमासिकस्य दर्शपूर्णमासाप

शा॰ दी॰
२

2

र्वसंबंधिनः गुरुमतेन समाघाते न शंकते यस्येति। य र्मसाकांक्षतया ग्राहकारव्यस्य यस्यापूर्वस्यावघातांगं तदपूर्वं
साधनमित्यर्थः व्रीहीनवहंतीत्याख्यातेन संनिहितापूर्वमवघातान्वितं प्रतीयते अवघातस्य च तस्मात्तदपूर्वांगते
ति तत्साधनद्वारा तदंगतेति पर्यवस्यति। तेन ग्राहकीभूतसाधनमवघातद्वारमिति व्रीहीनित्युपदेशशास्त्रार्थः प्रकृतौ।
दर्शपूर्णमासिकत्वादिविशेषस्तु नांतरीयकतया न विवक्षित इति भावः। तदेतदूषयति। तथा सतीति। प्रदेयतया ग्रा
हकापूर्वसाधनत्वाविशेषादित्यर्थः। अथेति। औषधादेः साक्षादपूर्वसाधनत्वादाग्नेयादिद्वारा साधनताद्वार
भेदादिनेति सैवौषधादिधर्माणां द्वारमतो व्यवस्थेत्यर्थः। द्वाराभावात्। आग्नेयद्वारकापूर्वसाधनद्वाराभावात्। स्व
मतेन समाधत्ते। उच्यत इति। अवहंतेरित्यनंतरं हविः प्रकृतितयेति शेषः। अवघातेनापूर्वसाधनद्वारतासंप
न्नेति हि साधनतावच्छेदकतापन्नेनैवेति द्वारसंबंधबोधकवाक्यस्य प्रकरणाकल्पितप्रधानतावाक्यैकवाक्य
तयाऽयमर्थः पर्यवस्यतीति भावः। न चैवं सति नीवाराद्यवघातप्रदेशात् स्वधर्मप्राप्तिः स्यादिति शंकनीयं। उपदे
शकालेऽवगतापूर्वसाधनत्वानां संनिहितानां च व्रीह्यादीनामेवापूर्वसाधनत्वसामान्यरूपेणाप्युद्देश्यतयान्व
यात्। अतादृशानां च नीवारादीनां मत्वनयादिसाशपात्। अपूर्वसंबंधिविशेष इति। अपूर्वीयफलत्वेन स्वर्गस्य
तदुत्पत्तिद्वारापूर्वसाधनव्यापारत्वेन चरुतद्धीरत्वमित्यर्थः। एवं च निर्विग वाक्यविनियुक्तेषु विचारमुप

राम
२

दर्शपूर्वपक्षसिद्धांतौ संक्षेपतो दर्शयति· तत्रेति· उद्देश्यस्वरूपस्य चमसाधिकरणन्यायेनाविवक्षोपपत्ते
र्वाक्यभेदादुद्देश्याविवक्षाहेतोरभावादित्यर्थः· अवघातादेः·· अवघातादिविधेः· आनर्थक्यात्· व्रीह्यादिस्वरू
पस्य तेन विनापि सिद्धेर्हेतोर्नवैयर्थ्यात्· तन्मात्रमेवेति· साधनतामात्रमित्यर्थः· व्रीहित्वादेस्तु तल्लक्षणोपल
रात्वाद्युगपद्वृत्तिद्वयविरोधाच्च न विवक्षितमिति भावः· सममाद्ये तु धर्मीशां पारिप्लवत्वनिवमित्यर्थमपूर्वा
र्थत्वमात्रमुक्तं ननु व्रीहित्वादेर्द्वाररूपाविवक्षणमित्यपौनरुक्त्यमिति ज्ञेयं पौनरुक्त्यपरिहारायाह· तद्देत
द्देति· द्वितीयवर्णकस्यैव व्याख्यान्तरमाह· तथेति· अपूर्वविशेषो निमित्तं येषां तत्रेत्यर्थः· एवं च भेदे नैमित्ति
कोऽभवदपूर्वविशेषसत्तिधर्माविहितास्तु भावेन सौर्यादावुपदिष्टा इति व्यवस्थासिद्धिरित्यर्थः· तस्यैवे
ति· द्वितीयवर्णकस्यैवेत्यर्थः· अपूर्वार्थत्वमुक्तमिति शेषः· नन्वेकस्यैव तात्पर्यवैरूप्यादिभाष्यग्रंथस्य पक्षत्र
यकथं पौनरुक्त्यं नेमाशंक्याह· तदेतेष्विति· निमित्तं· अनुष्ठानप्रयोजकं· ननु निमित्तत्वबोधकयच्छब्दाभा
वान्निमित्तस्यैवासिद्धौ कस्य निमित्तत्वमिति शंकाऽसंगतेत्यत आह· न चेति· यच्छब्दाभावेपि कादाचित्कप्र
वमनुरोधेन तत्कल्पनमावश्यकमित्यर्थः· साध्यत्वात्· तत्त्वेन प्रतीयमानत्वात्· तथा च निमित्तत्वभाव्यत्वयोर्यु
गपदेकत्र विरोधान्नापूर्वस्य निमित्तत्वमित्यर्थः· नन्वेवमप्यत्र हेतौ किं बाधकमत आह· तत्त्वन्येति· तस्यादिमत्वं

तरमहइतिशेषः साध्यत्वं निमित्तता पामनुकूलं न तु विरुद्धमित्याह साध्यं हीति। असिद्धस्य कथं निमित्तत्वं तत्रा
ह अनिष्पन्नमिति। परिवर्त्तमानं अनुसंधीयमानं। न चैतावतापि प्रकृतस्यापूर्वस्य निमित्ततानन्तु विकृतमपूर्वस्ये
ति कथमुक्तमत्राह। विकृतमपूर्वमिति व्रीह्यादिस्वरूपं तु न निमित्तमानर्थक्यादिति भावः। सूत्रार्थं तु यत्तत्कर्मा
पूर्वं प्रधानं यद्धि स्यात्तच्चोदनाभूतं प्राप्तभाव्यतयेति शेषः। तस्य साधनेषु द्रव्यादिषु संस्कारस्तन्निमित्तकस्तदर्थ
त्वादिति॥ ॥संस्कारेषु॥ ॥संगतिं दर्शयन्पौनरुक्त्यं परिहरति पर्वेति। तत एव। अपूर्वार्थत्वादेव। संक्षेपतइम
स्यैवार्थकथनं प्रतिज्ञेति। आक्षेपसमाधानात्मिकां संगतिमाह इदानीमिति। अधिकरणत्रयस्य प्रयोजनमा
ह। तत्रेति। विपरीतमुक्तं मध्ये दुर्बलस्य वा नाबाधेपि ततः प्रबलान्लिंगाद्वर्त्कोप्यानाय। एवं लिंगबाधेप्यतिप्रब

स्य

लश्रुति कृतशंकोप्यानाय्येति तेयं। यद्यपि द्वितीयवर्णकप्रथमव्याख्यानोक्तं व्रीह्यादिस्वरूपानादरेण साधन
विशेषार्थत्वमेवोपरितनेषु निरधिकरणेषु प्रपंचयिष्यत इति तत्रोक्तं अत्र तु तदीपतनीयव्याख्यानोक्तमपू
र्वार्थत्वं प्रपंच्यत इत्युच्यते तथाप्यपूर्वार्थत्वेपि व्रीहिस्वरूपाविवक्षाया अपि सत्त्वान्न विरोधः। उलूखलादि
विशेषणत्वेनोक्तस्य प्रोक्षणस्य हि समर्थत्वमपूर्वार्थत्वं वेति संशयानुपपत्तेराह तत्रेति। उलूखलादेर्वाक्यांतरेणा
र्थाद्व प्राप्तेस्तद्विशेषणप्रोक्षणमेव विधेयतया प्रधानं। यन्तयोरिति। साधनसंस्कारस्य तत्र द्वारातत्साध्यार्थत्व

तम
३

मिमर्थः इदंविति। उत्खननादेहं स्याद्गवपूर्वं च साधनत्वासंदेह इत्यर्थः। पूर्वपक्षमाह तन्नेति। एवं श्रुतिवाक्यानु
गुणत्वात्। हंसमर्थ्यतेति घट इदं उभयं। हंसाधूर्तत्वमपूर्वार्थत्वं च उभयेति। हंसपूर्वाभयान्वयस्यापूर्ववाचकपद
भावेनासंभवादित्यर्थः। तद्धान्न हीति। नचेति। सकृच्छ्रुतस्योभयार्थत्वे वाक्यभेदापत्तेरिति भावः। श्रुमेकवाक्य
तयाशीघ्रविनियोगे चाकांक्षाविरहान्न प्रकरणात्कल्प्यविनियोगात्तस्य दृढ इत्याह। बाधिवेति। आनर्थक्यप्र
तिहतानांविपरीतं वन्नामितिशंकामपाकरोति। नचेति। ननूपकारकत्वे सति कथं न तादर्थ्यमत आह। यद्येति
नगृह्यते। नांगत्वेन स्वीक्रियते। पूर्वपक्षप्रयोजनमाह नावेति। व्रीहीणां व्रीहीत्वाना नखनिर्भिन्नमिस्यादिना
विहितेरागसूयांतर्गते च गविस्यर्थः। अभ्युपेत्यवादेनाह। अथापीति। अवघातावसाये अवघातस्वरूपमात्र
शेषतापत्तेः। ततद्वारेणाहिताति। वक्ष्यमाणापूर्वं जनकव्यापारविशेषत्वे नविवक्षितावघातद्वारेणेत्यर्थः। अ
न्यथावघातत्वेन द्वारत्वे समानर्थक्यतादवस्थ्यात्। नहीत्यादेरसंगमापत्तेः तेन। प्रोक्षणेन। तस्य। अपूर्व
स्य। तद्रूपस्येति। अपूर्वसाधनताविशेषस्येत्यर्थः। अलौकिकत्वादितिभावः। नन्ववघातत्वमपि प्रकृतत्वा
दत्र विवक्षितं तथा च नखनिर्भिन्नेतद्भावान्नो हृदयतआह। तस्य रूपेति। युगपद्वृत्तिद्वयविरोधात साधन
ताविशेषलक्षणोपलक्षणात् तस्य रूपपद इत्यर्थः। नन्वेवमप्युत्खनन संस्कारद्वारेणापि साध्य नविशेषार्थत्वा

५

शा॰ दी॰
४

न्यवेषु प्रोक्षणानां न स्यादत आह । एवमिति । तदेव दर्शयति । स्वरूपं । उक्तरत्वन्नस्वरूपं । हेतिसाधनरूपं । अवघात
साधनत्वं । अपूर्वव्यापार इति । अपूर्वजनकव्यापार इत्यर्थः । तथा च तादृशव्यापारसाधनसंस्कारद्वारा प्रोक्षणस्य
तादृशव्यापारांगत्वमिसपूर्वांगतायां पर्यवसानेन न त्वनिर्भिन्नत्वेन त्वानां निर्भेदनस्य च तादृशद्वारत्वेन प्रो
क्षणासिद्धिरित्याह । तदेवमिति । सिद्धस्यैवापूर्वयुक्तत्वस्य विशेषविचारार्थं तयावशीकांतरमाह । एवं वेति ।
पावत्या । मंद्रमध्यादियादृशस्वरया । स्वापूर्वं । दीक्षणीयापूर्वं । तस्मादिति । दीक्षणीयावांतरापूर्वद्वारा ज्यो
तिष्टोमापूर्वसाधने स्वरविशेषविधिरित्यर्थः । उच्यत इति । स्वापूर्वद्वारा परमापूर्वसाधनत्वलक्षणायां
हि न लक्षितलक्षणा । स्वापूर्वसाधनत्वलक्षणामात्रेणोपपत्तौ न युक्तेत्यर्थः । न च परमापूर्वसाधनत्वमात्रेऽ
व लक्षणायोपपत्तिः । तस्यातिप्रसक्ततया द्वारविशेषलक्षणाया आवश्यकत्वादिति भावः । एवंजाती
यकाः । मंद्रं प्रायणीयायां मंद्रतरमातिथ्यायामित्याद्याः । एतेन स्वापूर्वसाधनत्वस्पर्शोपस्थितत्वेन । त
न्येति । प्रोक्षणानां तन्त्रेत्यर्थः । आरादिति । अभिक्रमणादीनामित्यर्थः । तदिति । प्रयाजेत्यर्थः । ननु प्रोक्षणात
न्यव्रीहिनिष्ठसंस्कारस्य नापूर्वपदवाच्यत्वमिति कथं तत्रापूर्वप्रयुक्तत्वमाशंक्याह । संस्कारोपीति । प्रयो
जनं पूर्वपक्षे वायव्यादिस्वतंत्रपशुष्वग्नीषोमीयपशुधर्माणामनतिदेशसिद्धांते त्वतिदेशः । एवमि

राम
४

त्र तातीयेषु द्यागस्यैवपायाइति मंत्रान्नतिदेशादुक्तः सिद्धांतेवातिदेशो नास्तीति द्रष्टव्यं ॥ ॥फलदेवत
योश्च ॥ ॥पूर्वोक्तप्रधानापूर्वार्थत्वाभावापवादसंगतिः अगन्मेति सुवः स्वर्गं अगन्मेत्यस्यैवहर्षपुन
रुक्तिः अग्नेत्विति रूर्ध्वलोकगतमैश्वर्यमहमनुष्यो धृं तयेपमिति देवताप्रार्थनं आनर्थक्यपरिका
मपाकरोति फलस्येति सर्वतो पूर्वादेरप्यपेक्षया अग्न्यादेरिमादिनाग्निस्वरूपआनर्थक्याभावादुक्तः
ऐश्वर्ययोगात्तल्लोके वियाच्यमानस्यैवरातादेः फलदानत्वदर्शनादितियाच्यमानेस्यनेन सूचितं मंत्रप्र
काशनमात्रेणापफलसिद्धेः प्रमाणां विना कल्प्यनाऽयोगा द्यागस्यैवतत्साधकत्वस्य विधिवरोनावगमा
तत्प्रकरणपावेनचमंत्राणां तदपूर्वार्थतयैवार्थवत्वमितिसिद्धांतमाह सत्वमिति सत्यपीत्यभ्युपे
त्यवादस्सूचनं अग्निमाधिकरणोनिरसिष्यमाणत्वात प्रयोजनमाह ततश्चेति सूत्रार्थस्तु फलदेवत
योश्च प्रयुज्यमानानां मंत्राणां तादर्थ्यात्तत्प्रयुक्तत्वं स्यादिति पूर्वः सूत्रपदानुबंगेणात्रेयं ॥ ॥देवता वा ॥ ॥
आक्षेपिकोमनंतरसंगतिमाह एवमिति देवतात्वेनैवप्रयोजकत्वं देवतात्वं तु प्रत्ययस्वरूपेनत्वपूर्वसाधनतारू
पमतउक्तप्राधान्यान्नमंत्राग्रहः परस्वरूपदेवतास्वरूपप्रयुक्तत्वात्रस्यच्चदेवतांतरेऽसत्वादित्याशंक्य इति
मानः प्रकृतसंगतिमप्याह अपूर्वतत्प्रयुक्तवादी मन्वर्थः अस्याः देवतायाः सकाशादिमन्वर्थः साधनत्वपि

स्यनंतरं देवतान्तदर्थेति शेषः तच्चेति कर्मणा इति पंचमी एतच्च यजेर्दानार्थत्वमभिप्रेत्योक्तं पूजार्थत्वमव
लंब्याप्याह यागइति तदेवं पर्यस्मानदेदेवं चतुर्थ्याश्रवणादन्यत्रापि यागानुष्ठानकाले च तदर्थ्येन देवतोद्देशा
दिति भावः एतात्मकयागस्य देवतार्थता च तस्येति तन्न कर्तव्येत्याह अतइति ननु देवतायास्तद्वाराक्षणस्यवा
पन्नतन्नकत्वे मानाभावः किंतु समानपदश्रुत्या यागस्यैव तच्छ्रवणादित्यत आह अवश्यं चेति प्रसादार्थत्वे पि
न धर्मीणात्प्राणर्थक्यमित्याह शब्दे केति साधनत्वेन देवतां गन्तातीत्यन्वयः साधनत्वायोग्यतामाह सिद्धे
ति क्रियान्वयं विना विध्यन्वयायोगान्न ह्याकांक्षासंनिधियोग्यत्वैर्यागेन स्वर्गं कुर्यादिति वाक्यार्थावगतावि
तरस्य इव देवतोद्देश्ययागार्थत्वावगमात्तस्य प्रधानस्यापि कारकत्वप्रक्रियांगत्वान्नोकेप्यतिथिप्रभवेः फलजनन
नशक्त्यभावेन तस्य ज्ञाया एव फलसाधनत्वावगमान्न देवताप्रसादस्य फलसाधनत्वकल्पनायुक्तेति सिद्धां
तभोकौव्याचष्टे प्रथयेति अनेन प्राधान्यं सूचितं प्रवाहानादित्वेन वेदप्रतिपाद्यतास्यादित आह सम्प्रपीति
प्रत्नस्य इतस्य तथैव तेनभिमाधर्षवादान्नेवलेदर्शयति यवितिश्रूयमाणानामित्यात्मवमेध इत्यादिः ननु
तेषामप्यधिकात्रोद्देवतास्यादतः किंचेति सिद्धान्ते हि चोदनाप्रमाणकत्वेन द्रव्यक्रियास्वभावो हेतुः पूर्वपक्षे
तु नोकवित् ज्ञा प्रमाणकामांदेवं नं दैस्वभावकल्पनेति भावः पावकः पवचनः तस्मादिति विग्रहहविः प्रतिग्र

नभोजननत्वमित्रप्रसादरूपपंचकाम्यावेनदेवताप्रयुक्तत्वायोगादित्यर्थः प्रयोजनं मूलाहात्रहरूपे सिद्धांतपूर्वप
क्षयोर्द्वैयं॥ ॥ द्रव्यसंख्या॥ ॥आक्षिप्यसमाहितायामपूर्वार्थतायामतिदेशात्संगतिं दर्शयन्नधिकाराशंका
माह। वाक्येति। द्रव्यसंख्यायास्तु घृतादाह। अथ वेति। साधनसंबंधे। अपूर्वसाधनसंबंधे। आग्नेयादेः साधनत्वाप्य
व गर्गाणामुपस्थपूर्वसाधनत्वकृतां तेषामपर्याधिकरणोक्तव्यवस्थाप्रमाणे कृमापि सत्र्वाचनिप्रसंगपरिहारा
र्थतोत्र्यातेनागतार्थत्वं सूच्यते। सिद्धांतेत्यपूर्वसाधनत्वेनरूपेणाप्रोक्षणास्य व्रीहिद्रव्यप्रयुक्तत्वादुक्तसंश
यानुपपत्तेस्तात्पर्यार्थमाह। यदिति। तन्मात्रेचेति। व्रीहिमात्रे च। ननु प्रोक्षणविशिष्टमित्यर्थः। पक्षद्वयेपि प्रयो
जनमाह। स्वरूपेति। प्रधानविधावितिकर्तव्यतात्वेन विशेषणाभावादित्यर्थः। ननु प्रोक्षणस्यानतिदेश
प्यतिदिष्टव्रीहिमित्सदपेक्षणादिकृतौ प्रोक्षणं स्यादेवं त्याशंक्य एवमपि व्रीह्यभावे तन्मात्राप्तिर्न स्यादिति
प्रयोजनमित्याह। व्रीहिमात्रे चेत्यादिना। अन्यस्य प्रोक्षणांगतानस्य तद्रूपस्य प्रकृत्यवगतरूपस्य
द्रव्यमुदाहृत्य संख्यामुदाहरति तत्रेति। त्रीन्परिधीन्निति। त्रिः समिधइत्यादि मंत्र इत्यर्थः। सिद्धांते परिधि
द्धयवतिमहापितृयज्ञाद्वदाह। पुनरुंइद्वितीति। मंत्रस्य प्रकाशनसामर्थ्यरूपलिंगेन विनियोगादत्र तु अ
तिविनियोगस्याप्रमाणत्वोक्तेरित्यर्थः। कथं तर्हि सूत्रे तदुपादानमत आह। प्रतिप्रसंगेति। तन्यज्ञेवा

रा. दा.
६

स्यादिति विनियोगोऽर्थं नोऽसर्वेषामप्युदाहरणत्वसंभवादिति भावः। पक्षस्य पूर्वोपमात्रे लिंगविनि
योगे नातिप्रसंगः। अन्यत्र मंत्रस्यासामर्थ्यात् यो च तन्निराकरणोपि नोदाहरणतायुक्ता। तथापि मन्त्रेण न
मंत्रैरणापूर्वीयप्रकाशयेदित्येवं लिंगेन श्रुतिः कल्प्यातत्र पूर्वीयपरिच्छिन्नत्वं प्रकाशयेदिति। विशिष्टानुवाद
दोषादतरे इत्याये न गौणोप्यर्थे इति प्रसंगान्न निराकरणायुक्तं। तत्रापरिच्छेदद्वारकापूर्वसाधनताविशेष
स्योद्देश्यतावच्छेदकत्वांगीकरणे नेति तेयं। सूचीकटाहन्यायेन प्रथमं समुदायमुदायमुदाहरति। तथेति
समुदायप्रयुक्तत्वेतस्याविकृतावनतिदेशादभिमर्शनस्यानर्हत्वे सिद्धांते तत्त्व इति प्रयोजनं तेयं। इसारांके सम
नेनकृतव्याप्यस्यापि उक्तादेः कत्वंगत्वदर्शनात्तु छत्वमांशकायादर्शितं। ईदृगशंकानिरासेनाराद्रुपकारि
त्वे सति हेत्वक्षिकरणोद्वार्यादिविकल्पमात्रनिरासइति नयौनरुक्त्यमिमाशयः। हेतुमित्रोदाहरणेषु साधा
रणं पूर्वपक्षं व्रीहीन् वाक्यमुपलक्षणतया कृत्वाहैनत्रेति। प्रक्रिया। प्रकरणे। सिद्धांतमाह। व्रीह्यादीति। रूपं। स्व
रूपं। प्रोक्षणस्येति पूर्वान्वितं। अस्मात्। प्रोक्षणात्। तस्य रूपस्य। व्रीह्यादिस्वरूपस्य। शास्त्रेति। व्रीहिमियंते
त्तेति शास्त्रबोधितमित्यर्थः। ननु व्रीहीन्प्रोक्षतीति वाक्ये साधनत्वेन व्रीहीणामनभिधानात्कथं ते न रूपेण प्रोक्ष
णस्य संबंध इत्यत आह। शक्नुवंतीति। हवीरूपत्वं। हविः प्रकृतित्वं। तेनात्मना। तेन रूपेण। एवं च स्त्रुवादिष्वतिप्रस
गरूपद्वितीयपूर्वपक्षोपि निरस्त इत्याह। हवीरूपस्य चेति। पर्याप्तानामपि ताद्रशत्वान्नसाधारण्यमिति मेवेतिभावः। न

राम
६

च व्रीहित्वस्यापि विवक्षा सकृदुच्चरितो व्रीहिपदे युगपदुक्तिद्वयविरोधात् ननु व्रीहीणां मेधसुमनस्य मानइति मंत्रस्यापूर्वसाधनीभूतान प्रकाशये दिति पूर्वरीत्या विनियोगे सत्त्वनादिव्यावर्त्तावपि यवव्यावृत्तिः कथं न स्यादिति चेत् सत्यं तत्र विधेयमंत्रस्य व्रीहिप्रकाशकत्वसामर्थ्यवशेन व्रीहित्वस्यापूर्वव्याप्ति साधनत्वेनउद्देश्यतत्वाकारतत्स्य चयवेष्टभावेन तद्व्यावृत्तिसिद्धेः लिंगकल्प्यवाक्ये व्रीहित्वस्याप्युक्तसामर्थ्यवशेन विवक्षा गोकारे सकृदुच्चरितस्योभयपरत्वासंभवदोषस्याप्रसक्तेः श्रुत दुक्तं रूपमाराग्यस्य वाक्यस्य न्यूनाधिकविकल्पने न क्षणाणां वाक्य भेदादिदोषो नानुमितेयसावितिः विवक्षितार्थबोधनसमर्थस्यैव वाक्यस्य कल्पनादिति हि शब्दार्थः अवहनना दीन्च पूर्वसाधनत्वमेव प्रकृतित्वे न न लक्ष्यते तावतैवानर्थक्यपरिहारात् तनापूर्वविशेषसाधनत्वपर्यंतं तद्गमकमंत्रसामर्थ्यनुदिहेगमकाभावादिति दिक्॥ ननु शास्त्रांतरेणापूर्वसाधनत्वावगमे व्रीह्यादिपदे न तल्लक्षणाया क्तविनियोगः एकेनैव वाक्येन द्व्यसंस्कारयोर्विधाच पूर्वसाधनत्वस्य प्रागवगमाभावात् कथं ते न रूपेणासंस्कारविनियोग इति पृच्छति यदि पुनरिति उत्तरमाह सुतरामिति लक्षणां विनैव सर्वथाः एतदेव दर्शयति नहीति व्रीहिसंबंधे हि साधनान्वयाभावाद्वानर्थक्यं स्यात्तत्संस्कारकाणां मिथः संबंधस्याव्युत्पन्नत्व भवति एवं च प्रोक्षितेर्य जेत व्रीहिभिश्चेति द्वयोः क्रियान्वयान्तरं व्रीहितानीयं प्रोक्षितसाधनमितिपार्ष्टिकान्व

नोट

यइतिस्पष्ट[illegible]साधनान्वयइत्य[illegible]प्रोक्षणास्येमत्र छेदः स्पष्टत्वमाह· नतश्येति· अत्रयवव्य हरांवैकतय
वाभिप्रायं· प्रोक्षितैरित्यादिवाक्ये प्रु[illegible]पागानुवादेनद्रव्यसंस्कारोभयविध्यसंभवेन विशिष्टकर्मविधानेसतियवा
नांतत्रनिवेशायोगेनतत्वाक्येयागांतरविधापत्तौ प्रोक्षणास्यपवसाधारणपासंभवादित्याहुः· मन्त्रो ऋ प्रकारद्रूप
मपिनास्तितत्रापूर्वसाधनान्वयः कथमितिव्युत्पादयितुंप्रघ्नति· यत्रैति· सावैश्वदेवीति वाक्येन भावीयोवि
नियोगस्तद्वदगम्यपसाधन·त्वंतदपेक्षस्तद्‌र्थइत्यर्थः· अन्यथा· पय· स्वरूपमात्रार्थत्वे· ननूद्देश्यवाचकपयःप
दस्यलक्षणांविनाकथंसाधनरूपान्वयइतिशंकते· नचेति· सिद्धांतीत्वाभिप्रायमाह· नपदात्रति· पय· पदमिम
र्थः प्रवृत्तिवेलायामेव· संस्कारान्वयबोधवेलायामेव· । किंतर्हीति· अयोग्यतानिश्चयाभावादिति भावः· तद्रूपस्य
संस्कार[illegible]पिवस्य· सावैश्वदेव्यामिक्षेत्यस्यार्थइर्शयतितदयमिति· अस्यैव· तच्छद्देश्य वरोनैव[illegible]नुव्रीहिन्
प्रो[illegible]पि[illegible]पेवेरीमानक्षणात्तस्यादित्याशंक्याह· व्रीहीनित्यादिविति· तत्रसंस्कारविशिष्टव्रीहिपरामर्शी
कश[illegible]भावेनसाधनरूपान्वयार्थंव्रीहिपदेनलक्षणावश्यकीतिभावः· अशब्दे· पय· शब्दानभिधेयं· वाचो
वृ[illegible]र्थीवहारोग्रंथकृतामितिशेषः· विचारप्रयोजनमाह[illegible]ति· ॥ अधिक[illegible]तार्थमुपसंहरति· तस्मादितिम
त[illegible]योगत्वेवाक्यांतरावगतविनियोगत्वं· व्रीहीन्प्रो[illegible]भवद्धिनियो[illegible]गत्वं· संस्कारवाक्यातगम्य

मानविनियोगत्वं। प्रोक्षितैर्व्रीहिभिरित्यादौ भाविविनियोगत्वं संस्कारान्वयोत्तरकालावगम्यसंस्कार
विशिष्टविनियोगत्वं। पश्चात् तस्य पयसो मादावित्यप्यर्थः हेतूदाहरणोपपादकस्य र्पञ्चि। संख्यासमुदायपयोरपि ऽ
प्यन्यायेनैवाप्रयोजकत्वसिद्धेः पृथगनुपसंहार इति ध्येयं ॥ ॥ देशाबद्धे ॥ ॥प्रधानापूर्वार्थत्वापवादकं
नैं तरसंगतिः स्मरेति। पत्नस्येवाउपांशुकृतिः रा। षष्ठप्रगतिः स्मरच्छ प्रगतावितिक्षा त्वनुसारात। पश्चा
कुक्षिस्थ च्छप्रगाथाः कुक्षिंवरीकरोति तथा यतः पत्नमितिक्ला तिः संशयकोटि तन्न प्रयोजनेत्याह।
किमिति। विकृतिषु राजसूयादिषु तद्गारंभके पुरस्तादुपसदां सौम्येन प्रचरंतीत्यादावित्यर्थः प्र
येति। प्रकृतौ प्रपगर्णान्तरताबर्हिषो भावात्तद्धर्मान्वेनादृप्ये यथा न भवंति तथेत्यर्थः सूत्रानुसारासि
द्धांतेनोपक्रमते। वाग्यमनेति। प्रणीताः प्रणेष्यन्वाचं यच्छतीति वाग्यमो यथा प्रणयनोत्तरभावि प्राक्
तोद्घेवातरापूर्वार्थत्वस्येत्यर्थः प्रकृतीति। उद्देश्यविशेषणासमर्पकत्वेहि विकृतावत् न्तरूपानुष्ठानादि
रोधैप्रपो[illegible] प्रयोजनवत्तरत्वं कृतित्व[illegible] प्रयोजननिमित्यर्थः तेनोपांशु चरंतीति विधौ विशेषणांप्रा
गभागः [illegible] विशेषणात्वमित्यर्थः अग्नीषोमीयोत्तरावधित्वेन विशेषणं। प्रयोगद्वारकसंबंधित्वेन च
पदः प्राग्भागस्य स्वसंबंधित्वेन तेनाधिनापर्यवसानाभावादिति भावः ननु प्राचीनशब्दस्य भागवचन

रा॰ द्री॰
८

8

त्वमसि इत्यादौ किंतु तत्तत्पदार्थवचनत्वमेवेति शंकामाकृत्याधिकरणान्यायेन निराकरोति॰ प्राचीनेति॰
वर्तत इत्यनेन नासिद्धांतेपि भागस्योद्देश्यतावच्छेदकत्वमावश्यकमिति सूचितं॰ तदुक्तं मंग्रंथेति॰ भागध
र्म एवेत्यर्थः॰ भागधर्मात्वं चसाक्षाद्देसं भवान्नहारंभकपदार्थोगमं त्रद्वारेति ते ये॰ एवं भागतन्यापतो
मानाभावेन भागसंबंधियज्ञापूर्वसाधनत्वमेव भागनिष्ठं लक्षणायमितिपरमापूर्वं प्रयुक्तत्वमुप
प्र त्वस्य बोध्यं॰ दृष्टांतवैषम्यमाह॰ नामिति॰ एतद्यानुपदमेव स्फुटीकरिष्यति॰ उक्तसूत्रेकृतेत्यर्थः॰ प्र
रणातासंयोगेन विहितं वाग्यमादि यथावांतरापूर्वार्थं तथोपांशुत्वमिति माघसूत्रार्थः॰ उत्तरसूत्रे स्पष्टा
र्थः॰ प्रकृताधिकरणमध्ये एव कथमधिकरणांतरमत आह॰ प्रकृतेति॰ दृष्टांतसिद्धार्थत्वादेतदाचि
तेत्यर्थः॰ तद्वीयेति॰ प्रकृताधिकरणसंबंधीत्यर्थः॰ प्रजापतिभूयं॰ प्रजापतिरूपत्वं॰ तस्यतत्त्वं धर्मीध
र्मत्वादित्यर्थः वादः॰ उक्तसंशयमेव सोपपत्तिकं विवृणोति॰ किंयज्ञभागेति॰ प्राचीनशब्देन द्वागवाचि
पदाभावेपि प्रतीयन्त इति तन्न उक्तत्वात् केवलं प्राणायनार्थत्वे तदृयवर्गोऽपवर्गो वा संसह विकृतानि स
तीय वधिविशेषेर हेत्वार्थ वापत्रेसत्त्वद्वारणाय प्रणायनलक्षितयज्ञभागो देशेनैव विधिर्युक्त इत्याशयः॰

राम
८

उतेति· पुरोध्यन्निति शाब्दमिहितकर्तृसंस्कारकत्वेनावगतस्य वाग्यमस्योक्ताववविवशेन कर्तृद्वारा प्रशा
पनहविष्कृदाह्वानमध्यवर्तिपदार्थांगत्वमिति भावः· वाग्यमस्य त्रिषय५ हेशयरूपः द्वितीयां तयन्नुपदस्य
तनिध्यताविषयत्वैवान्वयसामर्थ्यं· ननु भागविशेषपरातापाभिप्रायः· ननु यत्तस्य विभागविशेषत्वाद्वीप
विततार्थत्वमेव वाग्यमस्य स्यादित्यत आह· वाग्यमश्चेति· इत्यर्थतयांगार्थस्य तस्याकन्यरूपविता
रार्थत्वमप्याधिक्यमतोऽर्थवादः स्यादित्यदेवान्येनन्नमिप्रायः· अत इति· तद्देशानो· पत्तभागगतानो· भा
गांगत्वस्यापिपदार्थद्वारैव वक्तव्यत्वात्पदार्थांगत्वमेवयुक्तमिति प्रायः· उक्तव्याख्यानद्वयपरतां भा
ष्यस्य दर्शयति· भाष्ये यातिः पुण्यमित्यस्य व्याख्यायेप्य नेनान्वयः· प्रतरागमिश्यात्तेन व्याख्यापा
गमकृमाह· एवं हीति· प्रकृताधिकरणाभिप्रायेत माह· स्थितादिति· ननु क्रंप्रवृत्तिविशेषकरत्वाय
त्प्रवृत्तिनेनाप्यन्वय इति तत्राह· अपि चेति· यत्किंचित्कृतस्य यच्च किंचित्तेगमस्मिन्निमाहोसाकल्पा
र्थत्वमवदर्शनादिभिप्रायः· प्राचीनत्वस्याववेसाकांभवात् गीषोमीयस्य तत्समर्पकत्वेन विवक्षितोपिन
वाक्यभेद इति सूचयन्नुपसंहरति· तस्मादिति· सूत्रार्थस्तु प्राकृदेशसंबद्धमुपांशुत्वं तत्प्राप्तदेशवर्तिना
मंगस्यात यत्किंचित्कृतरूपमुक्तमिति संयोगात तस्यचाप्रदेशस्य तच्चभावात्तमस्य युक्तमुपांशुत्वमिति

शा॰ दी॰ ९ व॰ १

॥ ॥अग्निधर्मः॥ ॥अत्र संगतिमधिकरणात इव वक्ष्यति । नच तिसृणां वपनं नगार्हपत्येष्टकानामपि
परमाणुसंघातरूपत्वापत्त्या प्रतिपरमाणु च प्रोक्षणाशक्त्या प्रोक्षणविधिरनर्थकः स्यादत आह पचै
केति । तथाच न सर्वत्रावपपव्यपदे क्रियते इति नोक्तदोष इति भावः । पुरीषं मृत्तिका । पक्वामेति । प
क्वा इष्टकाः । आमं पुरीषं । अत्राप्यसंततसंश्लेषसंबंधाभावविरहाच्चेदवीजं । न चैवं व्रीहिष्वपि प्रत्येकं
प्रोक्षणापत्तिः । अग्नये वो जुष्टं प्रोक्षामीति मंत्रे बहुवचनेन तंत्रेणावगमात् । प्रकृते च तादृशागमकाभावा
दित्याशयात् । सूत्रार्थस्तु । अग्निधर्मः प्रोक्षणादिः पुरीषके स्यात् संघाततद्रूपत्वादग्नेः । चतुर्होत्रापे
र्णमासीमभिमृशेदिति वदिति ॥ ॥पत्नीसंयाजांतत्वा॥ ॥समूह्यपूर्वसंगादाह । समूह्यात्मकं द्वादशा
हधर्मं चिंतितेति संगतिः । संतिष्ठते समाप्यते तर्हि तदाः क्रियमाणः पत्नीसंयाजांतत्वे हेतुः उत्तमे लिंगा
लिंगमर्थः । असंस्थावचने । असंस्थितो हि स्यादिवचनं उत्तरार्थं व्याख्यानुमाशंकनं स्यादेतदिति । ननु तेन ह्य
नेन क्रियत इति वदयमर्थवाद इत्यत आह । अव्यापीति । निरालंबनमन्यत्र योगाद्विधिः समानविष
यत्वेन यत्रासंस्था तत्रैव विधिर्व्यवस्थाप्यते यथा तेजो वै घृतमिति वाक्यशेषात् अंजनं करणं तथा घृते व्यव
स्थाप्यते तद्वदिमर्थः । अत्र तु न विधिविवादे हसंदेहाभावे नार्थवाददर्शनसंकोचायोगात्तु तेनान्यथोपप

व राम ९

नेनैर्नैमित्तिकव्यवस्थेत्याह नैवमिति अपेक्षितविधित्वमुपपादयति द्वादशेति द्वादशाहेन प्रजाकामं याजयेदित्यनेन द्वा
दशाहयागानां तृतीयप्रकरणावेनक्रतूनां सांगानां साहित्यावगमादेकैकस्य सांगस्य पृथगनुष्ठानेन तद्बाधापत्तेरग्नीषो
मीयांगपूर्वांगानामवभृथांतानां च तत्रैकैकशो वानुष्ठानादेगसाहित्यसिद्धिः मध्यवर्तिगृहपतियागाभ्यासानां तु साहि
त्यं मध्यवर्तिपदार्थे कस्मिंश्चित्सर्वपदार्थमहत्वस्याप्यौत्तरानुष्ठाने स्यादतः कस्मिन्पदार्थे वस्याप्याप्तिमपेक्षायां
पत्नीसंयाजांतत्वनियमाविधिर्नाघवादिरित्यर्थः एवं चातिदेशप्राप्तपत्नीसंयाजोत्तरपदार्थनाम्ग्रहणमेहन्यनुष्ठा न
नवाध इत्याह चोदकश्चेति पूर्वपक्षेवैपरीत्यमाह शेषेति पत्नीसंयाजांगानां द्वादशाहव्यूहः सूत्रोपदेशमर्थः उप
रिष्टात् द्वादशाहनि उत्तरार्धं व्याचष्टे तथा चेति विधिः अक्ताः शर्करा उपदधातीति घृतशब्दस्य घृताघृतनक्षकल्पम
तन साधनतैलादिसाधारणविधौ स्यात घृतमात्रविधौ तु मुख्यार्थत्वमित्यर्थः तस्यापि विधेरपि अध्यायासंगति
माशेकते कः पुनरिति शेषत्नोपविचारोहितावलक्षणे संगतो नात्रेत्यर्थः पूर्ववेति द्वितीयत्रादिविकृतिषु यथाप्र
कृत्येवानुष्ठानादित्यर्थः सिद्धांते तु द्वितीयस्यांस्तवात्रपत्नीसंयाजांतत्वमपि तु सकलानुष्ठानमित्यहेइति नासं
गतिरिति भावः सूत्रेस्यषष्ठार्थम ॥ ॥अध्यायः॥ ॥प्रासंगिकाधिकरणाद्वयसमाप्तौ पाक्षिकं चि प्राचीनमित्येतद
पवादेन स्थानधर्मत्वसाधनासंगतिः पंचदशेति पंचदशसामिधेनीरनुब्रूयादिति वाक्येनेत्यर्थः आक्रम्य धि

ग्रा॰ प्र॰
१०

करणान्यायेन प्रथमाशब्दस्य प्राथम्यमात्रवाचित्वादाह नक्षत्रिमाधाइति· प्रवो वाजेति शब्दवती प्रवोवाजीयाऋक् कृत
कार्यमपूर्वं यजत नस्या पक्षिं चित्स्थानगता· तत्स्थानगतेति· तत्स्थानगतायाऋचो यत्कार्यं तत्प्रयुक्त इत्यर्थः त
त्रेति· अभिधीयते· न श्रूयते· स्त्रीमान्वयासिद्ध्यर्थमित्यर्थः प्रथमाशब्द: प्रथमास्वरूपेण आनर्थक्यादग्निसमिंध
नप्रकाशनद्वारेणापूर्वसाधनं प्रथमाशब्देन लक्षणीयं· तत्र च मंत्रांतरेति प्रसंगवारणाय सन्नि) लिंगावगतप्र
वो वाजा इत्याद्युक्तं विशेषणं नतु प्राथम्येन लक्षणोपक्षीणत्वादिति· प्रश्न ऐति· तथा च शब्दस्य प्रसिद्ध्वा तेन प्राथम्येनै
वापूर्वसाधनं विशेषणीयं नतु प्रवो वाजीयऋक्त्वेन लक्षणागम्येनेत्याशय: प्राथम्यैकार्थेति· प्राथम्यस
मानाधिकरणोऽसमर्थः लिंगोपपत्तिमाह· नुन्नोति· कार्यसमर्थ्यपा· अपूर्वसाधनीभूता अग्निसमिंधनप्रका
शनसमर्था पा॰· ता इति· सामिधेनीपांचदशयस्यैकदेशाहत्वावसंभवादिति भावः सूत्रंस्पष्टार्थम्॥ ॥इ
ध्यपावत्तौ॥ ॥त्रिरभ्यासस्य प्रथमस्थानधर्मत्वोक्तौ तत्प्रसंगाद्दारंभस्यापाया· प्राथम्यप्रयुक्तत्वचिंते
ति संगतिः आह तो हीति· असंशयाः संदेहरहिता· नआरंभांगमिथ्येन दर्शांगमत आह· दर्शेति· दर्शप
र्णमासारंभोद्देशेन विधौ विशिष्टोद्देशाकृतवाक्यभेदापत्ते दर्शाद्यंगत्वेनैव विधिः आरंभतस्तु प्राम
ण्वान्नरम्भ इत्याशयः· आरंभोद्देशेनैव हि विधिः सा च प्रकरणान्न द्वारेणादर्शांगमिति दर्शपू

रम
१०

त

र्णमासपदं प्रकरणाम्नातानुवादकं न त्वारंभविशेषणमित्याशयेन व्याचष्टे · आरभ्यमाणेनेति · क्रियार्थ्या पौर्णि
मास्यां नवे विधानादिति भावः · साधारणमनुवादयति · सर्वो हीति · इति कारणप्रवर्णाख्यः प्राचीनः · अभ्युपेत्यापि
दोषमाह · यद्यपि चेति · तथापीत्यस्य न सिद्ध्यंतीत्यग्रिमेणान्वयः · उपस्थितास्संकल्पविषयाः · ननु यावज्जीवाभ्य
स्तकर्मविधानाभ्यासे इत्यासंकल्पविषयतास्यादित्यत आह न हीति · यावज्जीवाभ्यस्तकर्मविधेर्हि जीवनिमित्तादिति भावः
निमित्तपरस्य यावज्जीवपदस्य पौर्णमास्यादिवाक्यैकवाक्यतानभ्युपगमात् · पर्वेति · एवं च प्रयोगभेदान्न सं
कल्पसाधारण्यमित्याह · तस्मादिति · किमिति · एतद्धेतुः संशयस्त्वारंभशब्दे · प्रथमानुष्ठीयमानांगवचनत्वे तीयप्र
वर्तनवचनत्वे इति · तेयः अन्वयो · दर्शपूर्णमासयोः · तस्य · अन्वाधानस्य · अस्येव शानच्प्रत्ययस्येव · तथाचार
भकर्मसंस्कारद्वारेणादर्शांगमित्यर्थः · एकस्यैवानेन प्रयोगभेदेपि कर्मैकत्वान्न तद्द्वारंभभेद इति सूचितं · अने
न · आरंभशब्देन ॥ ॥ अर्थाभिधानं ॥ ॥ क्रतोपयोगद्रव्यसमाप्यावृत्तिः प्रत इति संगतिः · असमवेतेति · कर्मांग
प्रकाशका इत्यर्थः · अदृष्टार्थतामिति · प्रशंसायादृष्टप्रयोजनाभावादिति भावः · अभिधायत इति सूत इति सविते
त्यादियोगेनेत्यर्थः · सवित्रादिपदानां दृष्टार्थत्वादाह · अग्निनावेति · सिद्धांती दूषयति · उत्पन्नाविति · उत्पत्तिवाक्ये इत्य
र्थः · तद्धितोक्तेन · तद्धितोक्त देवतात्वेनाग्निना · वैषम्यादिति पूर्वान्वितं प्रथमावगतत्वेन प्राबल्यादित्यर्थः · पक्षा

द्व्यसाधारणां द्रव्यणामाह मंत्रेति सवित्रादिपदानामग्निपरत्वेपिस्वशब्दाभिहितस्याग्नेः पुनः प्रकारांतरेणा
भिधानानपेक्षणान्मंत्रभेद इह मंत्रेति सवित्र आवरपकः तथाच देवस्यत्वासवितुः प्रसवे जुष्टं निर्वपामि अग्नि
नो वा इह भ्यां त्वा जुष्टं निर्वपामि प्रदमो इत्ता भ्यां त्वा जुष्टं निर्वपामि अग्नये त्वा जुष्टं निर्वपामीति चत्वारो मंत्राः स्व
दित्स्यर्थः च शब्देन चत्वारा च्छब्दस्याप्यनुषंगः संगृहीतः इष्टापत्तिमाशंक्य बाधकमाह सर्वं श्चेति जुष्टादिः शब्दः
प्रशंसितं स्तोतुं तत्फलंच प्रीचयितुमिति दृष्टार्थतैवेति भावः सूत्रार्थस्तु अपर्याभिधानरूपलिंगसंयोगान्मंत्रे
षु शेषभावः स्यात् तत्र मंत्रे प्रचोदितार्थकं सवित्रादिपदमूहमप्राप्तं चोदितस्यैव मंत्रेणाभृत्व तयाभिधाना
ति ॥ ॥ गुणशब्दः ॥ ॥ पूर्वन्यायेनाग्निशब्दस्याथ न ऊह प्राप्नोतदपवादसंगतिरितिसूत्र चयन्नाह तस्मिन्त्रेवेति
मंत्रे कर्पेन समवेतवचनस्तद्रूपपादयति जुष्टमितीति यद्यप्यग्निनेति तृतीया न श्रूयते तथापि तादर्थ्य चतु
र्थ्यांच [illegible] र्था अग्न्यर्थं यज्जुष्टमिम सवगतार्थादग्निनेति प्रतीयत इत्यर्थः संप्रदानंच तुर्थ्यावेहि कारकत्वादग्नेर्नि
र्वपान्वयान्न जुष्टे नान्वय इति नासमवेताभिधानं स्यात् नतु साक्षिद्दहातियोगाभावादिति भावः निर्वापकरणो
ति निर्वापः करणांयस्याः सेत्यर्थः तथाच निर्वापेणानुष्ठं करोमीति मंत्रार्थ इत्यर्थः जुष्टमिति क्रियाविशेषणं
निष्ठात्वाशंसापांभूतवक्षेमनुशासनादाशंसायां नतुभूत इति भावः सूत्रार्थस्तु जुष्टगुणभूतोग्निशब्दो

पितव्यानोपयच इति ॥ ॥ एवं प्राप्ते ॥ ॥ अत्रैगुणशब्दपक्षस्य गौणशब्दपरतया विषयांतरबोधनायेतद्व्यक्तिको
नरामिति सूचपन्नाह यथाश्रुतिः किंतु गौणार्थेति शेषः धान्यापसिधिन्यहि देवानिति दृष्टादितंडुलानावपती
ति विनियोगात्तंडुलेषु प्रयुक्तो धान्यशब्दस्तदर्थः तंडुलानाममुख्यत्वप्रदर्शनाय सत्वेषु मुक्तः व्रीहिरूप
स्तदर्थः धान्यं व्रीहि हि रिप्यादि त्रिकांडीस्मरणात् पूर्वपक्षमभूः समवेतेति नचान्नशब्दस्यापि स्वार्थपरत्वे लि
वाच्यं अदृष्टार्थतयाप्याम्नानोपपत्तेरन्यथा पाप्रमाणाभावादिप्राशयः सिद्धान्तमाह नभृणायेति
एतस्यैव वितनरणात् प्रकृतिवदिति इति कारणात् तंडुलावापे विनियोगस्यैव लक्षणातात्पर्यग्राहकत्वात्
अतएव चैषत्वेतिद्धि नन्वेतिविनियोगाद्यथा तत्रनादृष्टार्थ ॥ ते न मत्रापीति भावः ३ हस्कलमाह तस्येति
षड्विंशत्संवत्सरे शाक्यानामयनाख्यसत्रे श्रूयते सौर्यास्तेसंस्थिते हनिगृहपतिर्मृगयां याति स तत्र य
न्मृगान्हंति तेषां तरसमयाः सवनीयाः पुरोडाशा भवंतीति तत्रेन्यपच्यः ननु प्रकृतौ धान्यशब्देन प्रकृति
वाचि वाचि कृतिभूततंडुलप्रकाशनवदिहापि प्रकृतिवाचकमृगशब्देनैव विकृतिभूतमांसप्रकाशने
प्रयुक्ते धान्यशब्दात् प्राप्नवतेनेनन प्रकाशनवदिहापि प्रवृत्तागायाविकृतिप्रकाशनस्यैव शास्त्रा
र्थत्वावगमादतो न गौणी स्तरूपएव प्रयुक्तइस्माशंक्याह आर्षिकीचेति धान्यशब्दाम्नानादिवत् प्रकृ

मंत्रस्यांगमित्येतावन्मात्रं न प्रकरणात् विनियोगवशाद् आर्थिको न शास्त्रार्थः न च प्रकृतौ कृत्स्नाधान्यविकृतिवि
कृत्यान्न क्षमाप्येव कृतं न प्रिवात्र संभवतीति तन्निवृत्तौ वाचकमान्त्रपदो हि एवं पुरुषोत्तम् नाक्षालिकमंगपदो
हि इमर्थं इह च योगस्याप्यक्षिवायौ स्तोतिकृत्वाचितयोक्तं योगसंयोगाभावान् नाधिवापनमंत्रोक्तं इति यो
धं ॥ ॥चोदितेतु॥ ॥नाक्षालिकस्याविधानाच्छब्दस्य हि पुरुषार्थपरत्वपते शब्दस्य सुतरां तस्य सकृत्वपवा
दः कि पवइ तिसंगतिः इउानिगदः इउ पकृतेमादि रिडेपाक्ता नमंत्रः सूत्रे दे या अध्वर्यवइ पकृतां इपकृता
मनुष्यापइ मंपत्नथ वानपेक्ष पत्नपतिव र्दानितिमंत्रपावीपदे व्याध्य ध्वर्यवइपकृताइमस्यपइ मंपत्नम
वानित्यमनेनाध्वयः इपकृतामनुष्याइ मस्य चपपत्नपातिवर्षा नित्यमनेनेतितावयपेदाभिप्रायेतो नपुंदाहृते
एतदितिसापान्याभिप्रायोन पुंसकनिर्देशः स्यान्नतइ सादृव स्मिं मेननावयवाधा सर्वपक्ष मा हि इउे तिसा
मर्थ्येन लिंगेन इमा हि मादेः पूर्वेणान्वयः प्रदृष्टार्थ वाचिति मानवी घृतपदी स्वादिभिरेव प्रशोचनार्थ्य
त्वात् नित्यदेरस्याल्लनरहृष्टार्थत्वस्यादिति भावः पूर्वपक्षादेवेति इउेपकृतेतो सामुपक्षय नतइति वचना
दित्यर्थः स्यान्नतइ स्याद्यतु पूर्वपक्ष विनियोगाभावान्नैमित्तिको मंदेन विनियोग इति शेष इत्यभिप्रायेति भावः पू
र्वपक्षे कल्पनागौरवमाह हि इति न केवलं विनियोगकल्पनमात्रं परित्यक्तं मंत्रलिंगा

द्विविधः कल्पनीय इत्यपि तत्पेयं· लिंगेनापि ...र्न प्राधान्येन प्रकाश्यत्वावगम इत्याह· पश्वादेन चेति·
येयजतपश्विवर्धाश्वर्धयेयुत्तेमनुष्याउपकृता इतीरेपाकानार्थमनुष्योपाकानविशेषणांप्रद्धिस्तद्वि
शेषणोपजनपतिरिसमर्थः· स्वार्थेन· स्वप्रधानतया· फलमाह· सत्रेषु चेति· सत्रार्थस्तु· चोदिते प्राम्नाते पद
पतिरादेः परार्थत्वादिशत्तु समर्थत्वाद्विकारोनूहः स्याद्विधिवत्स्मृतं· पतमानो न्यारभत इति यजमानविधोपयेकेना
पितामि द्विरेवमिनापातिमाष्यानुरोधाद्विकरणांतरत्वेन व्याचष्टे· प्रथयेति· पर्वपक्षमाह· प्रहरणेति· यद्यपि
सूक्तवाके सूक्तदेवतामेवं धा प्रहरणोपायगइ तितती यउक्तं तथापि तस्य परार्थत्वान्न फलनाकोशेमायुरादिकीर्तने
तु समर्थमिति भावः· सक्तेनेति· सूक्तस्य हि करणत्वे सूक्तस्य प्रहरणप्रकाशकत्वेवि नानुपपन्नं· नचसाक्षान्त
संभवतीति विशेषणाप्रकाशनद्वारेणावाच्यमतो देवतावत्फलनयापि प्रहरणान्वयासमर्थः मंत्रस्येति· शक्यस्य
साक्षादुत्पादकत्वसंभवेन प्रकाशनद्वारा तत्समर्थवसानादिति भावः· नन्वेवमव्यापृतशास्त्रेनेकर्मत्वेन गुणाभा
वादेकयजमानकर्तृकत्वेन प्रकाशनेपि सर्वेषामायुरादिफलोपत्तिसंभवात्कथमत इत्यत आह· सत्रेष्वि
ति· आयुरादीनां फलत्वेन प्रकाशनस्य यजमानप्राधान्यं विनानुपयोगात्फलितया प्राधान्येनैव यजमानः प्रका
शनीय इति यस्तत्र्यान्न प्रकाश्यते तदीयप्रहरणे सूक्तवाकस्याकरणत्वमिति वैगुण्यापत्तिफलं स्यादि

तिभावः तस्यैव तदीयप्रहरणस्येव ॥ ॥असंयोगात्॥ ॥पद्यन्ते मानपदद्वन्द्वं हरिवदनादीनाम् इह प्रसक्तौ तदपवा
दः स्वंगमगतिः शुक्रमन्थिग्रहह्रस्वसाति तथा मरुत्साध्यसवनमुखीययागाभ्यासदेवताभ्यः तैः प्रकाशनार्थेः इ
त्यर्थः अग्निषूता इति इन्द्राग्निषु दग्निषोमा इति विहिताग्निषु संतके यागइत्यर्थः अग्नेपीति एतच्चैव वचनं अग्ने
पाग्रहणमवतीमग्निषु प्रकरणागतवचनेन ग्रहपागाभ्यासेष्वग्निदेवमरुत्वविधाना सवनमुखीयच
मसपागेष्विं इस्यैव देवताभेन तत्र समूहलापायागनहेनैवप्राप्तायानिवृत्त्यर्थः तेन शुक्रमन्थिसंतक
ग्रहह्रस्वसाध्यसवनमुखीययागाभ्यासयोरेव समूहलापत्ति सिध्यतीति तेषां पर्वेति हरी इत्यनेनतरेता
भ्यां द्वेयस्वं हरतीति शेषादेयः हरिवदनादीति हरि वन्हिकेतिसंबुद्धौ नकारस्य पत्वस्ते हसंबुद्धौ
छंदसीति विधानात् हादेशिन्नइहनिर्देशः आदिनामेधातिथ्यैर्मेधकौशिकेत्यादिसंग्रहः एवं चाग्नेआ
गच्छरोहितवः वहदानोइत्यादिग्रहः इत्यर्थः संतथा आरोपेतो मर्थः एवं चादृष्टार्थत्वान्नोहइतिभा
वः सूत्रार्थस्तुः हरिवदनादीनामसंवेधादर्थेष्विंद्रादिषु तद्विशिष्टहरिवदनादितिशिष्टमेवाग्न्यादिक
मपि प्रतीयनेति प्राच्योक्तवर्णकोत्तरमाह अथवेदमिति ॥ ॥अत्राग्निपूतिसमूहलापानिगद
स्याहि न स्यैव पाठोऽस्तीति पूर्ववर्णकस्य कृत्वाचिंतारूपत्वेनास्वारस्यविषयत्वं दोषः तस्येइति

तस्यापिएकहायन्याइत्यर्थः साध्यस्कैयते· त्रिवत्से· त्रिवत्सः सोऽ३ः सोमक्रयण्याइतिएकहायनीहवनेविहि
तेइत्यर्थः त्रिवत्सः त्रिवर्षः अत्रसिद्धांतेपितस्येतिपुंल्लिंगोहोस्येव· परंतुश्रुतादौनामन्यूहइतिदेयंनूहइति
त्रिवत्सगतगुणानांतस्यश्रुत्कंतस्यदानमपिमेवमूहइत्यर्थः तावच्चप्रचरोचनामात्रेचतस्मादिति· प्रसमवे
तार्थकत्वादित्यर्थः एकंचश्रुतादीनांहविर्दानादिवैचाप्याशंकयोपात्तानांसंगतिर्दैया· श्रुतादीनामपूर्वत्वादित्यासमञ्ज
वादिति·।। ।।लिंग।। ।।पूर्वोत्रलिंगोहवदिहापिप्रसक्तस्याल्लिङ्गस्यसमाधानात्संगतिः· ननुपश्चंतरागामग्नी
षोमीयविकृतित्वादतिदेशेनप्राप्तमद्विगुवचनंमेध्याप्रमपिलिंगोहेनभवत्येवेतिकथमयंविचारस्तत्राह· प
शुधर्माइति· अद्विगुर्देवानांशमितः अद्विगुश्चापापपश्चोभौ देवानांशमितारापितिष्ठतेः तत्संबोधनेनप्रव
रः प्राप्ताअग्रिंभरतेतिप्रैषोः द्विगुवचनपदार्थः तथाचसमानाविध्यंकृत्वाधितेपिपीत्यर्थः अयं· अप्रस्याइ
तीदृशादः एवंचतत्तीपाध्यायाधिकरणापूर्वपक्षप्रयोजनकथनमिदमिप्याहतेनेति· सज्ञार्थत्वकूः समा
नविधानेषुपश्चुषुसम्नुसारस्वतीमेषीद्विवगुवचनमप्राप्ता· संख्यावादिति·।। ।।आम्नानात।। ।।संगतिप्राह
साम्राप्रिप्ति· इदानींतदुपोद्घातंचिंतयतीत्वपः प्राप्तुदेशेतिकारइष्कतरपादगतसूत्रमारभ्यसमाप्तोहोव
श्यतेतमर्थंतमुपोद्घातइत्यर्थः प्रकृताधिकरणस्योपोद्घातत्वमुपपादयति· तानिहीति· तथाचोहपयो

गिनीप्राप्तिरूपरात्रिकरणोतदुपयोगि तथा च स्थानापत्तिरत्रोच्यत इत्यर्थः पदतापदीपइति· पदतापदतावोऽग्रन्ये
गिरा गिरश्च दक्षसे इत्यस्याम् ऋ मन्त्र मग्निश्शोपसाम· तदनंतरप्रकरणे इत्यर्थः· नन्वेतत्कृत्वो द्वैपमिदमनेनाग्नि
श्चोपस्तोत्रप्रवर्तमाक्षेनो हानो हे शनेत पद्धविधानात्तस्य गानस्तोत्रोपयसंबंधप्रतीतिर्गिरापदस्य तत्कन्यथेति
तन्नयबनत्वाभावात्कथंचित्कल्पकोटिरातस्तदुपपादनपूर्वकं पूर्वपक्षमाह· तत्रेति· कथं तर्हि इत्यादि समनु
ताद्· कथं वा इरापदविधेरर्थवत्त्वं तत्राह· प्रकरणात्विति· स्तोत्रसंबंधाद्वेगानसंबंधोपपत्त्याह· तदंगेति· पदताय
तीयेनस्तकृतीतेति स्तोत्रसाधनत्वसामर्थ्यगतं· तद्धि स्तोत्रसाधनत्वगानमिव्यक्तिरूपदृष्टद्वारेणो वे सामर्थ्यप्राप्तोगा
नसंबंध इत्यर्थः· गिरापदस्यापीति· पदतायतीयस्यवाक्ष्य पक्षगामित्व्यंजकतया साधनत्वस्य कथंच· स्तोत्रांग
त्वविनाश्योगादिति भावः· श्रुत्याः इरापदकृत्वा पदरूपया· विकारार्थकतद्धितरूपया वा· गिरापदस्यद्वेबं
न्यमाह· गिरेति· ऋक् यस्य त्रित्वसंपादनार्थं प्रग्रथनेपादं पुनरारंभ न इत्येवरूपं प्रगाथः यत्वितापदोऽस्य
तिभावपरत्वमेतत्कृत्वेति वाक्यस्योक्तं तद्युक्तं इरापदस्वरूपस्यदध्यादिवल्लौकिकत्वेनोपस्थितिविधानपे
क्षतया विनियोगपरत्वस्यैव प्रत्युक्तत्वादिमाशयः· गिरापदस्यापि प्रत्यक्षो विधिरितिशंकते· नन्विति· पदता
यतीयपशब्दस्य सामविशिष्टप्रगाथपरत्वादिति भावः· आकृतधिकरणान्यायेन सामसमात्रवाचित्वानुपपत्तौ
यतीयशब्देन ऋगुपादानमित्याह· समस्तमिति· एतदेवेति· अभिधानात्तकत्तौ साम्नः साक्षात्करणत्वास

14

मवादित्यर्थः एतदपि प्रगाण्यघटकतया विनियोगो न साक्षादिरापदस्येत्यर्थः तत्रापीति सूत्रार्थस्य क्रो
त्राधिकारे आम्नाताः इत्यपदादन्यदिरापदं क्वचनान्तर्बाधकं स्यादिति ॥ ॥ अप्रगाणात् ॥ ॥ ननु साम्नः स्तुतिमा
त्रनत्वस्य कुर्गच्छताभिव्यक्तिद्वारकत्वादिरापदस्य चाभिरापदस्य गानापन्नत्वात् कथमप्रगाणामिति पूर्वपक्षा
सत्राह तत्रेति चोदकात विधेः तथा चाप्रगीतेरापदविधिनान्यायप्राप्तप्रगानबाध इत्यर्थः अप्रगीतविधिनु
पपादयति प्रगीतादिति अप्रगीतत्वार्थेऽयं तद्धितः प्रगीताद्वा इता प्रगीताधिकारार्थे वेति विकल्पानन्त
नस्मिन्निधायाघपक्ष आह पदेति अप्रगीतपदस्वरूपमात्रप्रतीतेरित्यर्थः तदाह अप्रगीतादिति द्वित
यं दूषयति प्रगीतादिति तान्तव्यं प्रथमस्वरं च वृद्धं प्लुतं भवतीति छन्दोगसूत्रादिकारस्य तान्तव्यस्य भि
रापदगतस्य मध्यमापरपर्यायप्रथमस्वरत्वाद्युक्तस्य प्लुतरूपवृद्धौ सत्यां वृद्धेतान्तव्यमापि भवतीति वचनां
तरेणाप्यभावे वृद्ध्य इति प्रसन्नपेसतोऽयमर्थः ततोऽपि पक्षमाह यथापीति अत्र प्रगाणाभावस्या
विकारत्वान्न सहचरितत्वात् स्वर्यादिविवक्षितमिति वदति लोके साधनगीषु रातांगीतिमत्वस्योपसर्गिक
त्वा तद्भावस्याविकारत्वमिमामपि तु शक्यं वक्तुमविनिगमकमाह ततश्चेति प्रगाणां गीकारे विशिष्ट
विधित्वे गौरवान्न तद्धितस्यानुवादकत्वमेव युक्तमित्यर्थः गिरापदस्येति न गिरा गिरेद्रूपादे [illegible] वोऽहे यमिति

गिरापदनिषेधानुवादवत्वात् गिरापदस्यानेडरापदे विधीयते अन्यथा हि निषेधोऽपि विधेयः स्यादिति वाक्य
भेदापत्तिरिति भावः पत्वप्रगीतविधिबाधकत्वं हेतुत्वेनाह स्वप्रमिति । अप्रगाणस्य स्वार्थे तद्धितपक्षे शा
ब्दत्वादेव विध्यसंभवादित्यर्थः । विकारार्थकतद्धितपक्षेप्याह । प्रहृतान्तरेति । गिरापदभिन्ने रापदे स्वार्थः
निशिष्टविधौ च गौरवमिति प्राप्तप्रगाणानुवादकत्वमेतत्स्योक्तमिमाशयः स्यान्नापत्तिमेवोपपा
दयति पत्नायतीपेति । नष्टाश्वेति । कश्चिद्रथो नष्टाश्वः कश्चिच्च दग्धरथस्तत्र योर्यथा परस्पराकांक्षया
संबंधस्तथेहाप्यर्थः । स्वत्रार्थस्तु शब्दत्वाद्वेगिरापदभिन्नेरापदे अप्रगाणानां तथात्वात्तस्यैवोपदेशा
त्तद्रूप एव विकारः स्यादिति पर्वसूत्रगततद्धिकारपदानुवृत्त्या बोध्यः ॥ ॥ इति श्रीमत्सद्रामचंद्रसूरिसूनु
ना वैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां नवमाध्यायस्य प्रथमः पादः ॥ ॥ स्म मा
नि ॥ ॥ साम मेहविततानामाहोतरत्वं । कृत्स्नेति । कृत्स्नामयो वक्ष्यमाणागुणप्राधान्यविचारार्थमित्यर्थः
गीति विशिष्टमंत्रवाचित्वे ऋचः सामाभिन्नत्वेन तदनुपपत्तिरिति भावः । स्मृति द्धयापकप्रसिद्धिः उपदेशो
ऽहे बुध्रियमंत्रं मे गोपायेत्यत्रापि विद्वत्ति ऋचः सामानि यजूंषि इति वर्णितास्म कक्षागयुजुषसहचा
रत्ताभ्यामितिसोऽत्र हेत्वर्थः ॥ ॥ एवं वा ॥ ॥ विशेष इति । यत्रैकं साम तत्रैव प्रयुज्यमाने स इत्यर्थः । निमइ मस्य

वेदइत्यर्थः विचारफलमाह तस्मादिति अस्मिन्पक्षे स्तुत्यर्थत्वं प्रकृतसामानि मंत्रे वेदे एके आहुः ऊहग्रंथ कौषि
तइति ब्राह्मणोनकर्तृनिषध्वोक्तेः पौरुषेयत्वेऽप्रामाण्यापत्तेन तदसंभवान्न दपमुपदेशः स्यादिति प्रसिद्धिरिति ॥ ॥
कर्मणा ॥ ॥ नियतानि सप्तलतू यसामानधर्मप्रसंगादुत्पाप्रधानत्वरूपतद्धर्मापितेन नेतरत्संगतिः तत्रेति प्रकर्मका
नैसामाध्ययनादिरित्यर्थः एतदुपपादयति संस्कारेति नावितिसाम्नांप्राधान्येसमदृष्टार्थत्वापत्तेर्कर्मांगान्निष्ठ
त्वार्थत्वमेव प्रतिविस्मितित्तु वचनबलादकर्मकानांनाफिस्य स्यादिद्वाराकर्मोपयोगिनीत्याशयः कर्मकानतिप्र
कर्षातिशयबोधनायोपनयनवाक्यप्रदर्शनं एवमिति प्रकर्मकोनामिव्यक्तेरानर्थक्यादिदोषुनरीयक्ष्णोभ
पेदित्यादिभिः कर्मकानेगानविधानाद्वादृष्टार्थत्वमनिवार्यमित्यर्थः तस्मादिति एवंचकवच्युदृंसामगाय
तिकवताष्टरथंतरयघोन्यातदुत्तरयोरित्यादौसप्तमी श्रुत्याकचांगत्वात्प्रतीतिरित्यिप्रकृतेति भावः प्रक्षर
णामिति सामाम्नातत्वीतेति निरूक्ति साधनत्वं दृष्टद्वारासंभवेनादृष्टद्वाराकल्पनितमुकृतमित्यर्थः ननुक्तेति
प्रक्षरणाक्तताववि नियुक्तवाक्यादि संस्कारेणभवत्यानर्थक्यादितिभावः दृष्टफलत्वतः दृश्यमानफ
लत्वात् मन्कुवैषम्यमाह प्रयोजनमिति अव्यवधूतादिति सप्तम्यात्वर्थे प्राप्तसामाधारत्वानुवादिके
तिसेपं बहिः प्रयोगमध्ययनेत्वभ्यासरूपदृष्टप्रयोजनार्थमेवेत्याह यवितिरथेति योग्या शिक्षापरि
क्षा तदर्थंयथारयादेर्भ्रमोनेरवनतथेत्यर्थः स्तुत्यर्थत्वसामप्रधानकर्मविधेर्नक्षणाणिगमकर्म

कल्पनाध्ययनरूपमस्तीति॥ ॥तच्चेत्स्यात्॥ ॥आगमित्वं जनकत्वरूपपर्वसिद्धं तत्प्रयोजनस्य प्रसंचगान
स्याभिप्रायसमर्थना संगतिः ननु उक्तं चोरसंस्कारपितृपासासमसाधनत्वाभावात्तत्र तत्त्वित्वस्यकर्पसमाभागत्वम
तत्राह प्रधानेति साधनमात्रस्य द्वारत्वादचोचाधिकस्य साधनत्वस्य सत्वादित्यर्थः ननु उक्तं चायाधान्य
स्योक्तत्वात् प्रतिप्रधानं गुणावृत्तिन्यायेन प्रसचमेवगानं गुणकर्मत्वमत आह वचनेति सामगत्वे न त्रित्वविधिव
त्वादित्यर्थः एतदुपपादयति नहीति प्रसंचं गानसमाप्तौ कस्यापि दृष्टिगानद्ध्यक्तौ अकत्र पसाध्यत्वासंभ
वादित्यर्थः नच भ्यासाभिप्रायं त्रित्वमत आह क्रियतइति तथा सति नक्षत्रैवदोष इत्यर्थः करोतेरभ्यासप्रा
दुर्भाववचनत्वादिति भावः रथन्तरमिति रथन्तराख्यसामसाधनकं पृष्ठनामकं स्तोत्रं कुर्यादित्यर्थः एवं चेति
प्रधानमित्यर्थः नदोषभूतसामाविधिविरोधात् स्तोत्रीयपदादुपसर्जनत्वेनोपस्थितेरपि तत्तदेव एव त्रकल्प
तिछेदकत्वेनत्रित्वविधानमित्यर्थः नदोषइति अनुवादस्यैव तात्पर्यग्राहकत्वादिशेषं इति भावः सूत्रार्थस्तु
तच्चेद्व्यासस्य गानंस्यात्तच्चेत्क्रियतइति कृतिनिर्देशादितिः। तद्भ्यासः॥ ॥गानस्यैवविशेषचिंतना संगतिः
समयेति योनिसमच्छंदस्केत्यर्थः संशरेति संशरः साम्नोक्तिं स्वाध्याहिं सापासिप्रसमातच्च दोरपितत्त्रिष्यते
त्विनेशोऽन्यत्वं निशत्र न्यीभाव इत्यनोघजितत्त्रिष्यते यादिहि योनिप्नच्छंदस्कयोरुत्तरयोर्गीयेततदा

वशिष्टसामभागत्र्यास्त्रपामावाद्धिस्येत·पादिचयोऽन्यधिकछंदस्कयोर्गापेततद्वासाम्नोऽन्यतयावशिष्टाक्षरा
णांसामसंस्कार्यतानस्यादतोदोषद्वयपरिहाराय समपादेचगेयमितिभावः· इदंचयस्यसाम्नउत्तराग्रंथेउ
त्तरेनाम्नातेताद्विषयं· यस्यवाम्नानेतत्रपद्योऽन्यांतदुत्तरयोगइतीतिवचवचनेनविषमास्वपिगान
स्यादृश्यकत्वादितिबोध्यं॥ ॥नैमित्तिकं॥ ॥तच्चगानविशेषस्यकाविसमपास्विप्रेतदवोपदेस्यचवि
तन्नदसंगतिः· उत्तराग्रंथेति· छंदोगानांहिरण्यं तराद्दिसामयोनीनामेवपाठस्यकरणकोग्रंथश्छंदोनामकः
एवंयेकस्यसाम्नोयोनिपाठोत्तरमायोनिभूतकऋग्द्वयपाठस्ततःसाम्नांतरयोनिपाठइत्येवंयोनितदुत्तर
ऋकृठात्मकोपरःस उत्तराग्रंथइत्युच्यते· तेनोत्तरयोर्गापेतीस्यत्रसंशयइत्यर्थः· पर्वयपृथ्गमा ·· तत्रेति· ग्रंथमे
देनयोन्युत्तरद्वयोरपिपाठाद्विकल्पइत्यर्थः· संतेति· उत्तरस्यव्यापयामइत्यादिप्रतिसंबंधनपेक्षाप्र
योगप्रतीतिभ्यांपृथक्कृताक्षरावरूपकत्वान्निरपेक्षतपावशीघमर्थोपस्थापकत्वाद्वितस्यावन्नबल
त्रिपर्यर्थः· एवंचसतिप्रकरणानुग्रहोपापस्याह· प्रकरणेति· सूत्रार्थं तत्र· नैमित्तिकसंज्ञानिमित्तमेवोत्त
रात्वं· आनंतर्यात्· संबंधिप्रतीतिव्यवधानाभावादिति·॥ ॥एवंवा॥ ॥समासग्गानीपस्यापवा
दासंगतिः· पार्ष्ठिकेः· पक्ष्याषउत्तसंबंधिएकविंशस्तोमकः षोडशीसंस्थः· दौराजाख्यपञ्चसामेत्यर्थः

ब्रह्मसामप्रकृत्येतिशेषः संप्रदायेति । विनेशग्रहणात्तु न प्रकृताभिप्रायं । बृहत्येत्येतितत्रापेक्षयान्यत्वेन विने
शस्यासंभवात् । किंतु सेशयोर्विनेशयोरन्यतरप्रसंगस्य प्राप्तत्वात् विषमास्तु गानेषु बार्हतवासमास्तु गाने त
त्परिहारस्य हेतुत्वमिति सामान्याभिप्रायेणेति तत्त्वं । सिद्धांतमाह । बृहत्योश्चेति । एकविंशसंपत्तये । एकविंश
स्तोमसंपत्तये । अत्रैवावपंतीमिने तागमस्य पवमानस्तोत्रातिरिक्ते परिसंख्यानात्रात्रंगे तत्रारात्मागमः
किं बृहत्यासेनैव एकविंशतिसंख्यासंपादने विषमस्य द्वशाभिनिर्णीपादिप्रयोः स्तुत्यर्थत्वम् । बृहत्योर्देवा न
राग्रंथपाठभिमितानामपुनरावृत्त्यानेतर्पां प्रकरणाम्नातीयत्वेतेति ॥ ॥प्रागाथिकन्तु॥ ॥विषमासु गानेषु विशेष
चिंतनासंगतिः । योनिरोकेइति । योनिर्योगभूतेव बृहत्युत्तरयोरितिबृहत्योरन्त्येऽस्मिन्त्रिपदः । बृहती छंदसा
षट्त्रिंशदक्षरे भवति । किं विदक्षरत्रयमनवोपितव्यं छंदस्कं त्रव्यवहारात्रदोषः । अभिवेमस्यारभ्येतरं । त्वामिद्धि
मस्यावृहद्वि नैयं । पंक्ती । चत्वारिंशदक्षरपंक्ति छंदस्के । आधारभ्येतरस्य । अग्ने साव्रहतः । नवैइति । बृहद्
ध्यंतरात्मव्यसाध्यधये एकच्छंदस्कत्वकृस्माध्यनभवतीत्यर्थः । ककुप्कु दोषाविंशत्यक्षरं प्रग्रथ्येति । अभि
त्वाशूरनोनुमोदुग्धा इव धेनवः । ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुष इति पवितायां बृहत्यामायाद्दे
रथ्यंतरं गेयं । सैका स्तोत्रीयाक्कुकुः ततस्ताभ्येवयोनिं नत्वामिंद्र सादिकां पंक्तिं च प्रग्रथ्य गेयामित्यर्थः । तत्प्रकार

स्तर्ईशानमिंद्र तस्थुष इतिपादं पुनः पठित्वा· नत्वावां अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यत इत्यर्धेन सह
पुनर्गेयं· एवमष्टाविंशत्यक्षरात्मकं पू द्वितीया· पुनश्च न जातो न जनिष्यत इति पादं पठित्वा· अश्वायंतो मघ
वन्निंद्र वाजिनो गव्यंतस्त्वा हवामह इत्यर्धेन सह गेयं· इयं च तृतीया ककुप्· एवं प्रकारेणैकं साम तृचे क्रियत इति वि
हितत्वात्तृचसंपादने प्रग्रथनविधिवशादित्यर्थः· एवं बृहत्यपि बोध्यं· प्रगाथ्येति· स्मृतिपादिकानां· समाख्यावै
की· प्रकृत्यंगगाने प्रगाथः प्रकर्षश्च पादस्य पुनरादानादिति पादं पुनराराभत इति लिंगदर्शनाच्चेत्यर्थः· पादाभ्या
दभ्यसितृचि पाठः· अत्यंते इति विशेषविधिना बाधितस्य गौणस्याप्युपपत्तेरन्यथाप्रैतानर्थक्यप्रसंगादिति
भावः· प्रगाथ्यानिमित्तकं गानं स्यादिति सूत्रार्थः॥ ॥एवं वा॥ ॥विशेषणांशमाह· तत्रैवेति· एवं चातिदेशिकी
संगतिः सूच्यते· सिद्धांतमाह· प्रगाथ्येति· बार्हते तृच इति त्वेकं साम तृचे इति सामान्यप्राप्तानुवादः तैत्वपौ
धान्यपयोस्त्वप्राप्तयोर्विधिरिति· पूर्ववत्प्रग्रथनमेवेति भावः· अत्राह पुनानः सोमेत्याद्को बार्हतशब्दश्चते
बृहतीपठितात्तदन्यपादद्विरावृत्पादस्थानं ऊर्ध्वं व्याप्तितिलिप्ताः पंक्त्यक्षरानाविशद्भृतपाः प्रथमपादेन सह
द्वितीयपाबृहती· पुनर्द्विःषाः पंक्तेः समपादद्विरावृत्ता द्वितीयार्धेन समाप्यते इति तृचसंपत्तिः सर्वत्र चान्यांतर
नो किंचिद्भेदन्यूनाधिकभावेपि न छंदोविघात इति ध्येयं· अत्र लिंगदर्शनं· अभि प्रियु सोमाद्यं दिनंस

वनमिति॰ माध्यंदिनसवने पवमानस्तोत्रमेकं चत्वारि पृष्ठस्तोत्राणीति॰ तत्र पवमाने पंचदशस्तोमः पृष्ठेषु सप्त
दशः एवं च पशीति॰ स्तोत्रीयाः तासु काश्चित्पठिताः काश्चित्स्वग्रन्थनन्तव्याः काश्चिद्दाहृतिनन्यपाः॰ तत्र द्वादशककु
भः अष्टाविंशत्यक्षराः त्रयोविंशतिर्गायत्र्यः २४ बृहत्यः पंचचत्वारिंशत॰ षट्त्रिंशदक्षराः त्रिसप्ततिस्त्रिष्टुभश्चत्वा
रिश्चत्वारिंशदक्षराः तत्र द्वादशापि ककुभो द्वादशभिर्गायत्र्यर्धैः संयोजिताः सत्यो द्वादशत्रिष्टुभः संपद्यंते एवं
च त्रिपदाश्च अष्टौ गायत्र्यो व्यापिताः अवशिष्टाः पंचदशगायत्र्यस्तासां पंचचत्वारिंशत्पादाः तावद्भिः पादैः पंच
चत्वारिंशद्बृहत्यः संयोजिताः पंचचत्वारिंशत्त्रिष्टुभः संपद्यंते॰ एवं चाम्नाभिर्द्वादशत्रिष्टुभिः सह सप्तपंचा
शत॰ आम्नातापिक्षिप्तसहिः षष्टिस्त्रिष्टुभः संपन्नाः इयं च संख्योक्तप्रगाथेस्मिन्नेव घटते॰ अन्यथा पठिता
नां चान्यत्वात माध्यंदिनसवनपठितानां स्तूयमानात्रिष्टुप्षष्टिसंख्यानुपपन्ना स्यादिति॥ ॥
एवं वा॥ ॥ लिंगान्तरेति॰ चतुर्विंशतिर्जगत्यस्तृतीयसवने एकाच ककुबिति लिंगदर्शनं पूर्ववत्प्रगाथे
समेव घटते नान्यथेति दर्शयितुं विस्पष्टः तृतीयसवने आर्भवपवमानस्तोत्रं सप्तदशस्तोममेकं पतायं
ति पपेकविंशस्तोमन्यकं तयो॰ अग्निचोष्टविंशत॰ तत्र षट्का पञ्चः षडनुष्टुभः तिस्रो जगत्यः एकाककुप्स्मिक॰
पंचदशककुभः सप्तबृहत्यः ताश्चात्र गायत्र्या चतुर्विंशतिर्जगत्यो षट्चत्वारिंशदक्षरा एकाककु

प्रत्यासपचनदइतिवोध्यः॥ ॥एवंवा॥ ॥चतुःशतामिति·चतुरधिकंशतमित्यर्थः ऐन्द्राः इंद्रदैवत्याः वार्हताः बृहती
छंदस्का ऋक्साध्याः प्रगृह्यंत इति प्रगाथाः ऋचौ इत्यर्थः विशेषाशंकामाह ऋगिति·पादप्रग्रथनेन ऋक्त्रित्वबाधक
मू इति भावः अन्या इति·प्रगाथान्तरापेक्षया प्रगाथान्तरे ऋगभेदविधानादित्यर्थः॥ ॥अर्थैकत्वात॥ ॥गीतिप्रकारस्या
त्मिति·अक्षरविकारोनिकर्षणाभ्यासोविरामस्तोभ इत्येवंरूपाणामित्यर्थः तदनुरोधेन चेति·गुणाभूतप्रकारानुरोधे
नेत्यर्थः॥ ॥अर्थैकत्वात॥ ॥विकल्पापवादास्संगतिः तेषां चेति·यद्यपि तेषां प्राप्तावपि नह्यनेन वैकृतविधिः शक्य
स्तथाप्यर्थवादकल्प्यविधेराकांक्षाधीनत्वात्प्राकृतप्राप्तौ च तदसंभवादाकांक्षोपपत्त्यर्थं प्राकृतसाधनप्राप्त्यभा
वप्रतिपादनं युक्तमितिभावः अप्राकृतेष्विति·यथा वटस्तरराबाहिर्बर्हिर्द्वमीणामित्यर्थः अन्त्ववापनेन आग
तत्वंतः अश्वानुरागमनहेतुत्वेन ऋक्स्तुत्या ऋचः साधनत्वं साधपरिहृतायाः कल्प्यत इति विकल्पपूर्वपक्षं तत्कृमाह
तत्रेति·विस्पष्टेति· अश्वानुरागमनहेतुत्वस्य निंदागमकत्वात्तद्वरीकारहेतुत्वेन ऋक्प्रशंसानस्य स्पष्टा· अश्वानिरास
कत्वेन साधनत्वमित्यस्य स्पष्टा· ऋक्निंदानु नहि निंदान्यायेन साधनप्रशंसैवेति भावः सूत्रे न स्पष्टत्वादित्यस्य स्तुति साध
नत्वादित्यर्थः॥ ॥एवंवा॥ किंचिदिति·कर्मेतिशेषः सिद्धांतमाह अप्रगीतापाठस्य ऋक्स्वरूपावधारणाद्वारप्रगा
णार्थत्वेनोपक्षीणत्वादनन्यार्था प्रगीतैव साकांक्षेति सैव सर्वनाम्नोपि तात्पर्यविषय इत्यर्थः॥ ॥एवंवा॥ ॥त्रै
स्वर्यं· उदात्तादित्रयं· चातुःस्वर्यम· प्रचयापादिस्वरांतरमादाय· उपक्रमेति· सर्वशाखाप्रसिद्धन्यायेनापातत इ

उद्घात्राद्वित्रयं चात्‌ः स्वपूर्व इत्यर्थः दृष्टार्थानां समुच्चयस्य गीतरूपाय मानमिव निरस्तत्वादिति भावः मान इति पूर्वा
चार्यैराम्नैकश्रुतस्य संज्ञा ननु स्वराध्ययनेस्वरस्य कर्माङ्गत्वं विनानुपपन्नमत आह प्रयत्थेति कार्यान्तरोपक्षी
णत्वान्नस्वराध्ययनस्य कर्माङ्गत्वं किं त्वेकश्रुतस्यैवेति भावः बहुव्रीहौ पूर्वपदं प्रकृत्या स्वकीयस्वरेणैव प्रय
त्नं न तु समास निमित्तेनान्तोदात्तेनेत्यर्थः ॥ ॥सामप्रदेशे॥ ॥इत्यादिभिर्वचनैरिति शेषः योनिवर्णावशेनेत्यस्यावि
वरणं यस्मिन्नित्यादि पसंख्याक्षर इत्यर्थः संध्यक्षरमकारेकारसंधिनिष्पन्नमेकारादि नोह इति योनिवदेव
गानाद्विकाराभावादित्यर्थः ततः प्रदेशान्तर इत्यनन्तरमुत्तरयोरिति शेषः योनिवर्णावशेनेत्यनन्तरं गानमित्यनुषं
गः न चाक्षराणि व्यत्यस्यर्थत्वेन साम विधानादभिव्यज्यन्तां योन्तरावर्णावशेन गानं स्यादत आह किं चेति पघोन्या
तदुत्तरयोरिति सामस्वरूपमात्रातिदेशान्तदनुरोधेनाक्षराणि व्यक्तिरूपकार्यस्य योनिमात्रविषयत्वे न संके
च इति भावः दशमेति ग्रंगातिदेशोन्तरं यथासंभवं दृष्टादृष्टोपकारकं न्यनेति न्यायेनेत्यर्थः तदीयस्मिन्तांतत्स्
पकारपृष्ठभावेन पदार्थातिदेशरूपः कल्प्यातिदेशविषयो न वाचनिकेस्मिन्नप्रवर्तत इति भावः यद्विहीति
योनिवर्णावशेन गाने नूह इति यत्वयोक्तं तन्नदास्यादित्यर्थः वस्तुतस्तु योनावपि संध्यक्षरविरनेषप्रदेशे
कस्याप्यभावस्योत्तरयोरपि तथात्वमिमूहत्वेप्राह किं तर्हीति पद्मं सामस्तरूपमात्रमतिदिश्यत इति

19

तद्रूपत्वमिति । तथा च दृष्टार्थत्वाय यद्योन्यां तदुत्तरयोरिमक्षराभिव्यक्तिरूपोपकारातिदेशकमिति मा
वः अभ्युपेत्याह यद्यपि चेति । स्वरूपमात्रातिदेशोपि स्तोत्रीयाभिव्यक्तस्तोत्रसाधनत्वस्याक्षराभिव्यंजनकत्वं
विनानुपपत्तेरूतसिद्धिरित्यर्थः । योनिगानापेक्षया क्रमभेदस्य प्रधानभूताक्षरानुरोधेन जायमानो नदोषइ
त्याशयेनोपसंहरति तस्मादिति । सूत्रार्थमाह सामन्नः प्रदेशोऽतिदेशः सति विकाराम्नायाभावादिर्योन्यपेक्षः यद्योन्या
मितिशास्त्रकृतत्वादित्यर्थः ॥ ॥ स्तोभस्य ॥ ॥ सामान्यतिदेशप्रसंगासंगतिः भिन्ननामधेयेति । यथा तरमुत्तरयोरित्या
दिभिः स्तोभानां सामभिन्नत्वेनानातिदेशोपि प्रधानातिदेशात्तदंगस्तोभानामप्यतिदेश इत्यर्थः । नन्वेवं स्तोभानामक्ष
राक्षराणामभिव्यंजकसामभागानिष्पादकत्वयोपकारकत्वं । सच सामभागोऽर्थान्नोपात्त इति तद्वारापत इति तदंग
स्तोभानामपि नातिदेश इत्यत आह सामानीहीति । तथा च स्तोभनिष्पाद्यस्य सामस्त्रोयोनावपि सत्त्वात्तो दृष्टो
पकाराभावाददृष्टस्य चोत्तरयोरपि सत्त्वादतिदेशोपपत्तिरित्यर्थः । आग्वदिति दृष्टांतेन वैषम्यमाह । आगिति
द्व्यांतरे अंगांतर इति सिद्धपदार्थः ॥ ॥ अधिकं ॥ ॥ विवर्णं । ऋगक्षरविलक्षणं । अग्न आयाहि स्याद्वाऽवोनाऽ
पातिगायमाने औकारादिविकारे विवर्णत्वसत्त्वादतिव्याप्तिवारणाय अधिकमिति । ऋगक्षरं गंधे रभ्यो धिक
मित्यर्थः । एतावन्मात्रं चलत्यं ध्यादिः रितिभ्यासाति प्रसक्तमतो विवर्णमिति । सूत्रार्थमाह । ऋगन्यक्षरं पसत्तो

मद्धतिर्नैमित्तिराह· कुतः स्तोमशब्दस्य तत्र प्रयोगादिति ॥ ॥ धर्मस्य ॥ ॥ अत्र भाष्ये नीवारेषु व्रीहिधर्मा भवं
ति न वेति विचारः कृतः सत्त्वस्थानापत्त्यधीनत्वात्फलीभूत इति स्थानापत्तेरेवात्र विचार्यतेति दर्शयितुं धर्मप्राप्तेः
स्थानापत्तिफलत्वप्रदर्शनाय धर्माणामपूर्वसाधनप्रयुक्तत्वमध्यायादावुक्तमेवानूद्य इति· प्रकृतविस्पादि·
रूपसंक्षिप्य भाष्ये· प्रकरणावशेन वाक्यैकवाक्यतामापद्यमानैः प्रयमे वचोति· आकांक्षितप्रयोजनवशेनां
गवाक्यानां प्रधानवाक्यैकवाक्यतयापन्नानां वाक्यार्थप्रतीतिमर्थत्वात् स एव पारमार्थिकः पूरमता सर्वावि
षय इत्यर्थः· निवेशादिति· पुरोडाशस्य व्रीहीणां चानिवृत्तिरिति विशेषः· एवं च स्थानापत्त्यादर्थसिद्धधर्मानुष्ठा
नमित्ति सैवात्र विचार्यतेति प्रकृतमाह तेनेति· कृष्णरूपा स्थानापत्तेर निर्णीयात्वात्तद्विचारोपि प्रासंगिका
ह· तत्रेति· नीवारादीनां व्रीह्यादिस्थानापन्नत्वबोधकस्य शब्दाभावादिति भावः· सामर्थ्ययोग्यता· विका
रार्थकतद्धितरूपशब्दादेव कार्यापत्तिर्न तु प्रत्यक्षादिना आशंकामपाकरोति सामर्थ्येति· तथा च प्रत्यक्षमू
लकत्वाद्विकारार्थस्य प्रत्यक्षमेव स्थानापत्तिनिमित्तमत्रेति भावः· नन्वेवमपि न नीवाराणां व्रीहिकार्यपु
रोडाशकरत्वं किंतु चरुरूपकार्यकरत्वमत आह· चरुश्चेति· देवतेतिया गोपनभाषाणां· पागमहविःषु नैवपुरोडा
शस्य व्रीहिकार्यं तथा चरोरपि न कार्यं तावच्छेकाकांक्षत्वान्नीवाराणां व्रीहिकार्यकारत्वमित्यर्थः· एवं च तत्का

र्यजातीयकार्यकारित्वं तस्यानापन्नत्वमिति प्रतिपाद्यं । तेन च तन्नीवारन्यायादीनां भवांतरकार्यभेदेऽपि न
क्षतिः । ब्रह्मवर्चसादिफलस्याभिस्वर्गकार्यप्रधानयागप्रवृत्तिकारितयान तस्यानापत्तिः । कामनाविषयत्वे
न स्वर्गादेः प्रवृत्तिप्रयोजकत्वात् । एवं सौर्यादेरप्याग्नेयकार्यजातीयफलापर्यंतजनकतयास्यानापत्तिर्हि ह्रतनी
या । तथेति । द्वादशाहेऽप्युक्तं । संस्थिते पवाहे मधुग्रहणेन । घृतं देवति । पवाहे संस्थिते पवाहाभावे सततप्रपर्णः । एवं च
केनापि प्रतिबंधेन पवाहाभावे मधुग्रहणं विधीयमानं प्रयोजनापेक्षायां पवाहे कार्यमेव साधनाकांक्षाम व
नं बतद्यपर्णः । एवं च मधुग्रहणेन पवाहे कार्यं कुर्यादिति विध्यनुमानात् कार्यापत्तिरिपामिलधीः । ननु संस्थि
ते समाप्ते पवाहे तत्कर्मसंस्कारकतया पवाहांगत्वेनैव मधुग्रहणविधिः । तस्याशक्यसमाप्तिवचनत्वाद
विद्यमानस्य तद्योगादत आह इदं चेति । भाष्य इति शेषः । स्थिरमध्वाहरणं तु यः सत्रायाप्युत्तरेषु विद्यति
तायतेनेति द्रष्टव्यं । उक्तरीत्या तत्कार्यविधेरनुमेयत्वेनेत्यर्थः । प्रयायां । प्रत्यक्षवचनातिरिक्तमिति शेषः । अनुमा
नतः कार्यापत्तिं दर्शयति । तथेति । राजसूयेऽप्युक्तं । नैर्ऋतः । निर्ऋतिर्देवता । नखैरिति । नखावकृत्तानामित्यर्थः । किमि
ति । नखैरवपवनं विदलनं नतु अवघातोकावकृत्तव्यापारादन्यत्किं तु अवघातजनकव्यापारात्मकमेवेत्यर्थः
। अयमर्थः । यद्यपि नखावहननेन स्वनत्कार्यावघातजनकत्वं किं तु निर्भेदनजनकत्वमेव । तथापि निर्भेद

नावघातयोस्तुषविमोकानुकूलव्यापारत्वेन नखोल्लूखनसाध्यत्वावगमान्नेनरूपेणोक्यमवगम्य नखाना
मुल्लूखनकार्यकारित्वप्रतीतिः अनुमानं तु नखाद्युल्लूखनं साध्यं कार्यं तनकाः अवघातकार्यं तुषविमोकानु
कूलनिर्भेदनकारित्वादिति बोध्यं नीवाराणां व्रीहिकार्यं तंडुलनिष्पादकत्ववन्नखानामुल्लूखनकार्यविघा
तनिष्पादकत्वस्याप्रत्यक्षत्वान्नात्र प्रत्यक्षगम्यत्वशंकावसर इति स्वशब्दगम्यां कार्यापत्तिमाह परिधाविति
चानुमानस्येषुत्ति प्रवृत्तितः प्राप्तस्य यूपकार्यपश्वनियोजनस्य मुष्टिरूपपरिधौ विधानं स्पष्टमेव अपूर्वं नियोज
नोत्तरविधौ गौरवादिति भावः यद्यप्यत्र यूपीयत्वं नियोजनस्यैव न श्रुतं तथाप्यनुवादस्य पुरोवादसा
पेक्षत्वात्तत्र च यूपे पश्वनियोजनतेति यूपशब्दवशात् यूप शब्दवचनगम्येयं कार्यापत्तिः प्रतिषिद्धानुमित
शब्दगम्यां कार्यापत्तिमाह न तथेति अत्र हि गिरापदं निषिद्धस्यापि विधौ वाक्यभेदापत्तेस्तदनुवादत्वा
पत्तिरापदं कार्यं विधिरिरापदस्योभयपाको ऽन्यपाकन्यतरत्प्रसक्तः यद्यपि गिरापदस्य तत्तोत्साधन
त्वमप्रकृतं प्राप्तितत्कार्याभावे कथं तत्रेरापदविधिस्तथापि स्वरूपप्रयोगस्य तथा गिरापदे न कर्तृशक्येतस्मि
न्निरापदविधिर्नानुपपन्न इति बोध्यं सत्रार्थस्तः धर्मस्य कार्यप्रयुक्तत्वान्न सबंधात् इत्येव नीवाराद्यौग
णो संस्कारे मधशनादौ विकारे च नखावपनादौ व्यतिक्रमे पूपव्यतिक्रमे णाविहिते तपरिधौ प्रतिष्ठे

घेसतिविहितेऽङ्गापदाद्यौ चक्रोद्यमानधर्मसंबंधस्येरितिः॥ ॥तदुक्तमिति॥ ॥अनंतरसंगतिमाह आक्षे
पइति वचनादिति· अन्यार्थस्यान्यशेषत्वायोगात् साधनत्वमात्रं वचनार्थं इत्यर्थः ननु कार्यार्थी धर्माः साध
नेभ्यः क्रियंतामित्यत आह प्रकृतौ चेति· प्रकृतिवदनुष्ठानस्यातिदेशात् तदर्थत्वात्तस्य चाशेषभूतेः परिधाव
संभवादित्यर्थः प्रकृतौ शेषत्वमुद्देश्यतावच्छेदकं धर्मविधावितित्यर्थः· च· प्रकृतौ यूपधर्मविधौ न कार्य
न्तभ्वरणात् यूपपदे इति· प्रधानविधौ वाहवनीयपदे इव स्वरूपार्थं नेष्यानर्थक्याभावात् अतो नियोगतनार्थ
त्वाभावान्न तदर्थपरिधौ कार्या इत्याशयेनाह· यूपो यस्मीति· ननु यूपस्वार्थमेव धर्माः स्युस्तत्राह· न चेहेति·
सकलयूपधर्मानुष्ठाने विना यूपत्वयोगात् प्रसिद्धिवद्विरोधे न च सकलधर्माऽसंभवात्र यूपत्वरूपप्र
योगनमस्तीति भ ल्लोपाद्याधइतिभावः· पश्चात्त्वन्नेचान्तो यूपो भवतीति भेत्रमध्यगतस्य शालायां यूप
त्वासंभवान्न यूपधर्मानुष्ठानेन तद्धिद्धिरिति दृष्टांतार्थः· शेषत्वमिति· न स्वयुक्तत्वाभावेऽपि तदुद्देशककृति
कारकत्वमात्रस्य शेषत्वप्रयोजकत्वादित्यर्थः एतच्च सूत्रभाव्ये नोक्तं व्यक्तमतः धर्मविधौ साधनत्वमेवोद्देश्यताव
च्छेदकं शब्दावगतत्वान्न तु शेषत्वमशाब्दत्वादित्याह· यद्यपीति· ननु धर्मविधौ साधनत्वमपि न तु शेषत्वमेवेति
शेषत्वमेव कुतो न लभ्यते तस्मादाह· न चेति· यद्यपि यूपत्वरूपार्थं नोपादेयं वाच्यमिति तत्पार्थ्यं हरति· न

चपूपाख्यमिति॰ यदि हि छेदनादिसंस्कारैरवांतरव्यापारद्वारा करणोपकारकत्वेनैकं यूपत्वाख्यमदृष्टं जन्य
त इत्युच्येत तदा परिधौ सर्वसंस्काराभावाद्यूपत्वाख्यकार्यत्वेनोपात्तपरिव्याणादयः स्युः नचैवमिवं अदृष्टांत
रे मानाभावेन छेदनादिसंस्काराणामेवादृष्टादृष्टरूपाणां समुदायस्य समूहालंबनबुद्धिविषयत्वेन यूप
पदार्थत्वात् यूपे परिव्याणतीति च संस्काराणां यूपपदवाच्यानां परस्परनियोजनांगत्वात् तत्र दृष्टरूपद्वारसंभवा
च्च न लोप इत्यर्थः॰ यूपं छिनत्तीत्यादौ तु यूपपदे समुदायसमुदायिनोरभेदविवक्षयोपचारिकमिति भावः॰
वक्ष्यत इति॰ दशम इति शेषः॰ सूत्रार्थस्तु॰ तदुपत्ते॰ परिधानार्थत्वेनोपयोगात्तेनैव वक्ति पूर्वपक्षमीमांसा॰ कुतः तत्स
त स्यातनियोगनांगतापयुक्तत्वादिति॥ ॥परार्थत्वात्॥ ॥अत्रातिदेशिकी संगतिः प्रणीताः॰ प्रणयतस
स्कृता आपः॰ अतेचरु॰ दध्न॰ अध्यमिति तिसृभिरवरोपिष्यतदभ्रो॰ प्रदेयपयोः महत्स्वपराप्राणाधारतानु
वादकनयात् प्रणीताकार्यं तयोर्विनियोगः॰ प्रार्थ्यकसाधनत्वेन तु न धर्मसंबंधनिमित्तमित्यतिकाशंकेति
भावः॰ अर्थादपीति॰ साधनत्वमात्रेणाविहितेनापि द्वारत्वोपपत्तेरिति भावः॰ सूत्रार्थस्तु॰ परार्थत्वाता दावार्थ्य
कसामान्यं प्रणीतावत्साधनत्वेननुवैधं अतस्तत्र नोपवनादीति शेषः॰ संस्कारस्य तदर्थत्वात् अपराशेषा
र्थत्वादिति॥ ॥एकार्थत्वात्॥ ॥अपवादादनंतरसंगतिः॰ अध्यापसंगतिस्तु प्रासंगिकी॰ एककार्य

त्वादिति॰ पष्ठस्तोत्ररूपैककार्यजनकत्वादित्यर्थः॰ ननु चेति॰ साम्नोऽङ्गाभिव्यक्तिद्वारा स्तुतिसाधनत्वात्कस्माध्यप्र
रत्वादिप्रकारकत्वमिति हेतुमित्यर्थः॰ अत्राहेति भावप्रधाने॰ धर्मविधिपरशास्त्रतात्पर्यविषयीभूतं यादृशसाधनत्वं त
देव निमित्तं प्रकृते च रथन्तरादेरङ्गाभिव्यक्तिजनकद्वारकसाधनतामात्रे शास्त्रतात्पर्यं॰ रथन्तरत्वादिप्रकारभेदस्त्वाधा
रभूतक्रतुस्वभावकृत आर्थिक इति न बाधनस्याहेतुरित्याह॰ नैतदिति॰ तत्कृतः सामसाधनतायामङ्गाभि
व्यक्तेरेव योग्यतया निवेशो न तु रथन्तरत्वादिप्रकारस्य॰ तस्य गीतिरूपसामान्यायोग्यत्वादृचामेव तत्र सामर्थ्यादित्या
ह॰ किं चेति॰ अत्रादिरूपता॰ अरत्वादिप्रकारेणाभिधायकता॰ व्रीहीति॰ यथा व्रीहियवयोः कठिनकोमलत्वं
द्वलनद्वारकसाधनतायै विलक्ष्येपि हविः प्रकृतिसमाधारणापदैति॰ त्र्येशार्थिकं तथेहापीत्यर्थः॰ ननु स्वरूप
विवक्षायां कण्वरथन्तरादेर्नियमान्नादृयः स्तुतिप्रत्वरसाम्यपक्षभेदाश्रयणेन व्यवस्थापयाह॰ किं चेति॰ ननु र
थन्तरपृष्ठं भवतीत्युत्पत्तिविधौ पृष्ठशब्दस्य स्तुतिवाचित्वे किं मानमत आह॰ वाक्यशेषादिति॰ माहेन्द्रादि
स्तोत्रसंकीर्तनासदृशानि पृष्ठानीति स्तोत्ररूपगुणविधिनशास्त्रेत्यर्थः॰ स्तोत्रोपसंव्यापार एव सप्र
दशादिपदैर्द्वे प्रस्यपांतैरभिधानादिति भावः॰ वचनेति॰ रथन्तरं पृष्ठं भवति बृहत्पृष्ठं भवतीति प्राप्तिद्वादि
त्यर्थः॰ कण्वरथन्तरादेः सामसाधनकत्वं प्रकृतिप्राप्तपृष्ठस्तोत्रे विधीयते तत्र चाऽक्षराभिव्यक्त्यात्व

वृहद्रथंतरकार्यकारितयात स्थानापन्नं। तत्र धर्मसमुच्चयपक्षे तेऽप्यापवादिकी संगतिः पूर्वो विकल्पोऽव्यव
स्थापाकृत्वात्। विकल्पस्त्वं तिमतेत्वातिदेशिकी संगतिरिति। भाष्यानुसारेण पूर्वपक्षमाह। विकल्प
इति। प्रकृतौ धर्माणां व्यवच्छिन्नत्वात् समुच्चयाभावे नात्राप्यसति समुच्चये विकल्प इत्यर्थः। ननु प्रकृतौ
सामभेदाद्व्यवस्थावशेनासमुच्चयेऽप्यत्र सामैक्यात्समुच्चयः स्यादत आह। भिन्न इत्यपीति। प्रकृतौ नि
रपेक्षतया फलसिद्धिसाधनत्वेनावगतानां विकृतावप्यतिदेशात्तथा त्वमेव पुरुष इत्यर्थः। पक्षान्तरमिति
एकपक्षस्तोत्रापर्वप्रयुक्तेनान्यायान्यापि व्यवस्थानिर्देशभेदवशाद्धार्थिकी प्रकृतौ। विकृतौ तु नार्थिक मतिरि
त्यत इत्युभयकार्यापन्नैकरावरथंतरेऽभयधर्माणामविरोधात्समुच्चय एव युक्त इत्याशयः। एतद्दूषणपूर्वक
वार्त्तिकाभिमतं दर्शयति। वार्त्तिकेति। भाष्यसंमतपक्षस्तोत्रैक्यादप्युपगमेनापि समुच्चयपक्षपातावदाह। यथा
पातितेषां धर्माणां व्यवस्थितत्वादिति। निर्देशभेदान्यथानुपपत्त्या वृहद्रथंतरशब्दाभ्यां विधिगताभ्यां तत्र
त्रिपर्मापूर्वसाधनत्वलक्षणायां धर्मविधानात्तत्तत्र एव व्यवस्थानत्वाद्धार्थिकीति भावः। एतदेवाभिप्रेत्य भाष्य
कृतोक्तं। सामान्यापि हि दृष्टमदृष्टं च कल्प्यत इति। ननु प्रकृतौ सामविकल्पाद्धर्मविकल्पेऽप्यत्र सामैक्यात्समुच्च
यः स्यादत आह। एवमपीति। प्रकृतिवद्विकल्पेन प्राप्तयोः कार्यकरावरथंतरे विधीयमानं यदा पक्षकार्यार्थंतरा

त् उभयधर्मवदिति विकल्प एव युक्त इत्यर्थः न च करावरध्येतरतदाश्रयत्वात्सोमरूपसामग्र्यभेदात्कार्यद्वयमपि
जायमाने कुतो नाभ्युपेयमिति वाच्यं· समानतन्त्रादिधर्मभेदेन सामग्रीभेदोपपत्तेः समानतन्त्रादि समुच्चयस्य च का
र्यसमुच्चयाधीनत्वात्तस्य चानपेक्षितत्वे नास्तीति भावः अत एवाह· तन्त्रितेरपीति· तन्त्रतो हि प्राकृतोपकारसा
काङ्क्षतया निरपेक्षतन्त्रान्तरे यथा पूर्वपक्षे तन्न तु समुच्चयेनेत्यर्थः एवं पष्ठीतो त्रैकल्पिकधर्मविकल्पमुपपाद्य त
दुद्देकैमुभयन्यायेन तमाह· किमुतेति· अन्यतरेति· यद्यपदपूर्वार्थं तया। किं पतेतदानदपूर्वार्थानधर्मानगत्वा
तोऽस्यर्थः सूत्रार्थस्तु· अप्राकृते करावरध्येतरे तद्धि कार्यत्वाद्वत् इध्येतरे भयविकारत्वादुभयधर्माः स्युरिति शे
षः विशेषानुकेचिद्धवस्थयाः स्युरिति भाष्यमते· वार्त्तिकमते तु· वैरूप्यतो यस्य विकृतित्वात्प्रकृतिवद् प्रा
कृतेऽपि करावरध्येतरे व्यवतिष्ठेरन् अन्यथा चोदकविरोधादिति·॥ ॥ उभयसाम्नि॥ ॥ भाष्यमते आप
वादिकी वार्त्तिकमते त्वातिदेशिकी संगतिः संसर्वोपनतविशेषः ह्याभ्यामपीति· प्रकृतिप्राप्तपृष्ठानुवादेनो
भयविधावशं विशेषाम्नातपृष्ठद्वयस्योद्देश्यत्वात्समुद्देश्यं च वाक्यपरिसमाप्तेरेकैकपृष्ठकार्ये द्वयोः सा
हित्यावगमादेकैकस्मिन्नुभयधर्माः स्युरिति भावः· यदीति· तथा सति समुच्चितसामपत्विधौ विशिष्टवि
धिगौरवात् अप्राकृतकार्यकारित्वापत्तेरिति भावः· पृष्ठयोरिति· भाष्यमते तु साम्नोरिति· भाष्यमते तु

सान्नोरिति तेषं अप्राकृते तिरश्चीं तरस्य वहत्कार्यं वहतश्च रथंतरकार्यमप्राकृतं कन्ययेते समर्थः उभयसा
म्निसंसवादौ चैवं उभयधर्माः स्युरिति सूत्रार्थः ॥ ॥पार्वणा॥ ॥ अत्र च प्रसंगरूपां संगतिमाग्नेमासिकरणां
तेस्वपमेव वक्ष्यति । अराद्युपकारकत्वे प्रयाजादिवद्धि कृतिघातिदेशः संस्कारकत्वे संस्कार्यस्य समुदायस्याविकृ
ताव भावान्नातिदेश इति हेतुहेतुमद्भावः असंस्कार्यत्वादिति स्मरणारूपो हि संस्कारः कालस्य कर्मारंभ एवोप
युज्यते । पार्वणा होमयोस्तु प्रयोगमध्यवर्तित्वान्न तदुपयोग इत्याराद्युपकारकत्वमेवेति भावः । पूर्वपक्षमा
ह । काल इति । प्रयोगप्रावृत्यादिति भावः । कालाभावात्पा । कालदेवतो यागः । सिद्धांतमाह । पूर्णातेरिति । दानक
र्मत्वात् । दानक्रियावाचित्वात् । अन्येभ्योपि अदृश्यत इति वनिप्प्रत्यये पर्वशब्दनिष्पत्तेरिति भावः । यद्यपि
यागदानयोर्भेदस्तथापि शाब्दिकानां तयोरेकतया व्यवहाराद्यागस्यापि भावव्युत्पत्त्या पर्वशब्दवाच्यत्वावि
रोधः ननु पर्वशब्दस्योभयसाधारण्येपि । पूर्णमासं प्रपद्ये अमावास्या सुभगेति मंत्रवर्णवशात्कालं
गम्यायेन कालपरत्वं स्यादत आह तत्रेति । तथा च प्रकरणादिवशेन प्रधानवाक्यार्थनिर्णये तदाकांक्षावि
रहात गुणाभूतानुवादकमंत्रस्तदनुसारेणानेतव्यः । दृष्टागमच्छ नेतु प्रधानपदस्य विशेषनिर्णायकता तदभावा
न्मंत्रस्य नियामकतेति तैषम्यमिति भावः । नन्वेवमपि विकृतौ कुतो नातिदेशः पर्वशब्दवाच्ययागदेवता

सत्वादत आह तेषां चेति· देवतात्वेनान्वयवेनायां विधेयगतत्वेन साहित्यस्य विवक्षितत्वादिति भावः अग्नीषो
मयोरिवेति व्यासक्तत्वमात्रे दृष्टान्तः तत्र समासगम्यत्वेन एकाभिधानगम्यत्वाभावात· समुदायस्येति· स
मुदितानामित्यर्थः तस्य समुदितस्य· ननु समुदायस्यानतिरेकात् समुदायिनामाग्नेयादीनामपि संस्कारत्व
द्धि कृतौ कुतो नस्यादत आह अतद्विकारत्वादिति· सर्वसमुदायिविकारत्वाभावादित्यर्थः समुदायिषु मध्ये हि
तद्धि कृतावतिदिश्येत· न च समुदायिनां सोमादिविकृतिः किंत्वेकदेवताकत्वादिसादृश्यादाग्नेयादेरेकैक
स्यैवेति भावः समुदायिविकाराः तन्न समुदायिविकाराः न समुदायविकाराः न सर्वसमुदायिविकाराः· त
था च समुदायापूर्वप्रयुक्तत्वात्संस्कारस्य तस्य च विकृतावसत्वान्न पार्वणहोमयोः प्रवृत्तिरित्याशयः स्त
त्रार्थस्तत्स्य स्पष्ट एव·॥ ॥उभयोः॥ ॥पूर्वस्यैवेति· कानामी स्यापभ्रंशो हि उभयोः पर्वणोरभावापि होमौ
स्यातां· आरादुपकारित्वेनान्निंगकृतविशेषाभावादित्याद्यसूत्रे प्रयोजनकथनार्थम्· उत्तरं तु पस्य समु
दायस्य संस्कारिका अभ्यासाहोमस्तद्विषयः संस्कार्यवशादिति सिद्धान्तप्रयोजनप्रदर्शनार्थमित्यर्थः सं
गतिमाह· ऊहेति· करणावरणपूर्वतरादाविमत्यर्थः प्रकृतस्य तु विचारस्योहानुपयोगेपि प्रसंगात्कथनमि
त्यर्थः अवांतरकार्यदृष्टाद्दृष्टरूपं॥ ॥प्रयाते॥ ॥संस्कारकत्वापवादादनंतरसंगतिः देवतात्वेनेति· स

शा. दी.
२५

मिदादिशब्दानामग्निवाचित्वस्य वेदे प्रसिद्धेः समिधोग्न आज्यस्येति याग मंत्र प्रकाशकत्वाच्चेत्याशयः देव
तावाचकशब्दाभावमाशंक्याह द्वितीयेति उद्देशांशे कर्मत्वेन समिदादेरन्वयात् समिद्देरपकृष्टावगमाद्दे
वतात्वे द्वितीया यागस्यापि इति भावः उद्देशेति तथा चोद्देशांशस्य यागविशेषणत्वेन द्वितीयोक्तकर्मत्वानन्व
याच्च न भूतस्याग कर्मत्वस्य चासंभवादित्यर्थः उपचर्येति प्रमाणांतरप्राप्तानुवादकत्वान्न श्रवणमात्र
त्वेत्यर्थः प्रकृते तु नैवमित्याह नचेहेति न विधेयपरशब्दार्थ इति न्यायादिति भावः कथं तर्हि प्रकृतवा
क्यार्थमित्यत आह यागास्त्विति नामधेयानीति अग्निहोत्रमित्यादिवदित्यर्थः ननु तथापि नश्रवणादोषस्तुल्य
इत्याशंक्याह नचेति तथा तद्रूपसमर्पकतया विधेयं न भवितव्यद्दोष इति भावः सूत्रं स्पष्टार्थम्॥ ॥इति
श्रीमद्रामचंद्रबुधवरात्मजतत्सद्वैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां नवमाध्याय
स्य द्वितीयः पादः॥ ॥प्रकृतौ॥ ॥संस्कारस्य प्रोक्षणादेः प्रकृतौ पादस्य प्रथमपादे तन्त्रयोमंत्रो
हः उहस्तु प्राधान्येन मंत्रोह एव तत्साम्नोहस्य माप्यनवशिष्टोऽवसरसंगमात् चिंत्यत इत्याह मंत्राणामि
ति व्रीहीणां मेधेति मंत्रस्य पाठ्यां पुरोडाशप्रतिष्ठापनप्रकाशनार्थत्वाद्व्रीहिरूपस्य तद्भावान्नीवारग्रह
णां पुरोडाशार्थानिमित्त प्रायमन्योपन्नश्रवणं वा बोध्यमिति वदंति गतार्थत्वमाशंकते नचेति दशम

25 ख

राम
२५

घे कार्यातिदेशोत्तरं तत्सत्त्वमर्थेन पदार्थातिदेशोक्तेरित्यर्थः माग्नीति· आनर्थक्यप्रसंगादिति भाव
ः इहापि· सौर्येपि· अग्निपदेनैव सूर्यप्रकाशनोपपत्तेर्नोहसिद्धिरित्याह उच्यत इति· चोदकप्राप्तेनेति गुणाव
स्थाश्रयत्वेन विनियोगरूपहेतुः स्वचित· एतदेव सदृष्टांतमाह तथेति· नन्वैंद्री प्रमष्टवचनविहितत्वाद्
स्य गौण्या प्रकाशिका· कल्प्यातिदेशात्मंत्रः सूर्यपदोहेनैवोपकरिष्यतीत्यत आह· प्रत्यक्षेति· विनियो
जकत्वाविशेषात्प्रत्यक्षत्वानुमानिकत्वकृतवैषम्यमप्रयोजकमिति भावः ननु तस्मादृचं नोहेदिति निषे
धान्निगमेनोहाभावरूपभावात्मकत्वमेव कृत उच्यत इत्यत आह· तस्मादिति· एवं चन्द्रस्याप्रकाशनमेव नोहेदि
ति निबध्यत इति भावः· प्रकृताविति· प्रयमाशयः नपदार्थानां स्वातंत्र्येणातिदेशः तथात्वे सति कर्मत्वेषष्ठ्य
वघातस्यातिदेशाच्चरादेः श्रोर्थतास्यात् किं तूपकारातिदेशे समर्था तन्मुखेनेति प्रकृतौ मंत्रस्य पदरूप
मुपकारजनकं तद्रूपतया विकृतावप्युपकारस्तेन भावेन प्राप्तौ नु सामर्थ्यकाग्निपदबाधेन सूर्यपदोह
स्य युक्त इति· न च गौणसामर्थ्यसंभवान्न नु सामर्थ्यकल्प[illegible]मिति वाच्यं· मंत्रे समकृत्येठितस्याग्निपदस्य कृत्स्नसा
मर्थ्यातिक्रिसामर्थ्यकल्पनेगौरवाद्प्राकृतकार्यकल्पनायायुक्तत्वात्सदृशांतरप्रक्षेपस्यैव निर्दे
ष्टत्वात्तन्नस्य रूपेति· अग्निपदे तावदस्तिरूपद्वयं अग्निपदत्वं देवतात्वाचिपदत्वं च· तत्र दृष्टार्थत्ववशेनां

स्यमेतद्विवक्षितं न बाधं· तन्मात्रस्य पदस्यांशानुपयोगे नादृष्टार्थतापत्तेः प्रकृतौ देवताप्रकाशनस्याग्निशब्दं
विनाऽसंभवाच्चैनार्थिकत्वाद्बोधस्यार्थः तस्यैवेष्यमनेन व्रीह्यादिपदव्यावृत्तिः एतदेवाविष्करोति· अनवयंपहाति· देव
ताख्यस्य विधिगतशब्दनिरूप्यत्वादिति भावः तथा· स्तनौति शेषः उत्तरार्धं व्याचष्टे· एवं चेति· उपकारजन
कतावच्छेदकरूपेणोपस्थितपदार्थस्य तत्रापि देशान्तदेवतावाचिपदयुक्तमंत्रेणैव प्राप्तिरित्यर्थः ता
द्रूप्यं· देवतावाचिपदत्वं· उक्तं न्यायेन व्यपदेश्यातिदिशति· एवमिति· देवतावत्तद्वनियमाभावात् व्रीह्या
दिपदस्यानार्थिकत्वमत आह बर्हिष्विति· उक्तदृष्टान्ते वैषम्यमाह· ऐन्द्रीविति· स्वरूपेणा· इदंपदमुक्तत्वे
न· अकृत्स्नोपकारत्वेन प्रकृतमंत्रोक्तन्यायाभावादिति भावः· सूत्रार्थमुक्त्वा· प्रकृतौ यथोक्तमित्यस्य याम्नान
मेवक्रमाणां वचनं अभिधानं मंत्रैस्तत्थैवोत्तरस्यांततौ विकृतिपंक्तौ तत्प्रकृतित्वादित्यंतेन पूर्वपक्षः चरा
वेन्तव्याप्तिः अर्थे आम्नातकार्यत्वासंभवात् ऊह इति सिद्धांत इति॥ ॥जातिः॥ ॥कृश्चिदिति· पौरुहं चर्वं निर्व
पेद्विपैश्वाकामइत्यपि विषयार्थः बर्हिः पदं कार्यपरं· तेन बर्हिः कार्याशापुण्डरीकत्वन्यायानीत्यर्थः तद्धितस्य
तन्यत्वत्वरूपसंबंधपरत्वात्· पुण्डरीकं च क्षितौ पोतं पद्मापि लोके प्रसिद्धं तथापि वैदिकानां रूपप्रयोग प्रयोगप्रसिद्धं
पोगप्रसिद्धं तद्देवात्र विधेयमिति वोध्यं· वर्हिर्बिप्रकारे इति शेषः· पुण्डरीकपदमिति· पुण्डरीकस्य सामान्य

तोवाचकंपदमपदमिमर्थः अन्यथा तेनैव सकृद्गृहीतस्यापि प्रकाशनासिद्धौ रक्तपटोहस्यासंभवद्दुःखिकताप
त्तेः अथवा पुण्डरीकपदप्रयोगोपाधितामात्ररूपत्वस्य प्रसाराये नेदमुक्तमिति द्वैयं· पर्वेशेति· एतेन विशेष्यवा
चकपदोहमुपजीव्यविशेषणमुक्तगृहीतवाचकपदोहर्षितनादनंतरसंगतिः सूचिता· अदृष्टार्थमिति· हृ
रितगृहीतस्य कर्मांगत्वेनासमवेतत्वादितिभावः गृहीतद्वारेणेति· कर्मांगत्वेपि वस्तुतोदृष्टगतत्वान्न
मुख्येन दृष्टतत्तं रक्तसमर्थत्वसंभवान्नादृष्टार्थत्वमगतिकं युक्तमिति भावः हरिवदादिगृहीतानामर्थिंदृष्ट
त्वं न वा स्ववैकल्पिकमिति भेदः नानितेनाच कंतप्यानैमित्तिकं गृहीतानिमित्तकं च पदं पर्यायात्प्रानमप्युपमितिसूत्रार्थः ॥
॥ नौकिके ॥ ॥ ऊहविचाराभावादूहः प्रासंगिकमिति· कथं तत्राह· पद्येकमिति· यदि ह्येकेनैव पदइति यदि
बहूनेतेनैवापव इति वा क्याणि· निगोक्ति· न्यायत ऊहासिद्धौ विधिवैयर्थ्याद्रूहानिंगत्वेन प्रसक्ततमिमर्थः
नच्चैवं परिहृतं· मन्त्रस्यप्यापि प्रकृतावाम्नानात्प्राप्तानुपनंतत्रैव विकल्पे प्राप्ते नियमार्थोयं विधिर्नो न
स्तुं गमिति· एकस्येव कर्तुः पुरुषोभयार्थत्वेवैरूप्यपनियमस्यादतआह प्रकरणादिति· पद्यपि प्रकरणो
पादृष्टाविल्मादिनिमित्तासंभवाद्विवचनबहुवचनांतयोर्नन्निवेशासंभवस्तथाप्येकस्यवैदिकनिमित्तक
त्वेतस्सह चतादितरयोरपि फलाकल्पनन्नाद्यवाप्यविकृतिनिवेश इति सूचनाय फलेनापि ऊहन्यायेन

द्विवचनाद्यहप्राप्तावपिमंत्रत्वसिद्ध्यर्थंवचनमित्याशयः नन्वेवमूहितपाठार्थंवत्वेपियादृशावधित्वादि
विनियोगवैयर्थ्यं पाशन्यायेनकथं विद्धिकन्यायेनप्रकृतावेवनिवेशप्राप्तावुत्कर्षविधानार्थतयातत्सार्थ
क्यमित्याशयात् इत्यतः दुरितं पापं प्राप्नुचत स्वस्मिन्नस्याप्युपपत्तेरित्यर्थः अनर्हत्वादिति यूपो घूपरशात्तनादेः
स्पर्शनियतत्वेनग्रहणाग्रहणादि वद्धिकल्पस्यासंभवादितिभावः लौकिक एवेति कर्मानंगभूतेतदं
तर्गतेनद्धि हिर्मेतेचेत्यर्थः स्तुत्यार्थस्य दोषसंयोगाल्लौकिकेस्यात्तच्चिपतः अप्रवृत्तेर्निषिद्धे स्पर्शेनिषिद्धे
विधायतेप्रकृतौ वैदिकेतुनस्यादभावात्त्वान्निषिद्धायोग्यत्वादिति॥ ॥अन्यायस्ख॥ ॥प्रकृतमूहानंतरंव
चनोहविंततिवैदिकेत्तुसंगतिः तयोरिति एवंचार्थतः पदंत्वमुत्तराधिकरणस्येतिभावः निर्दृशमात्रेति के
वलप्रकृतिप्रयोगासंभवेनप्रयोगसाधुत्वमात्रार्थत्वादित्यर्थः नचेति अविकारस्यमंत्रस्यसंभवेसतिवि
कृतस्यातार्थस्याविनियोगोनयुक्त इत्यर्थः अप्रवृत्ति अनतिदेशः इतरस्य बहुवचनांतस्य सकलेति सं
ख्याविशिष्टेत्यर्थः प्रकृतौहि संख्याविशिष्टपाशप्रकाशकः पाशमात्रप्रकाशकस्त्वस्ति प्रकरणापा
ठात विकृतौतुसंख्याविशिष्टप्रकाशकेनैवप्राकृतकार्योपपत्तौ केवलपाशप्रकाशकस्यनातिदेश इ
त्यर्थः द्वयोरपीति मंत्रद्वयान्यानवशेनप्रकृतौ पाक्षिकविकल्पाभिधानकार्यस्याप्रिकृतसेनतन्मूहत्वेनबहुव

चनात्तस्याप्यतिदेशवर्त्तनासंभवादिति भावः॥ सिद्धांतमाह॥ ग त्वमिइति॥ संख्याप्रकाशनस्य प्रकृतावक्रमत्वे
पि साधुत्वार्थमत्र ह इत्यर्थः॥ एकस्मिन्निव द्वयोरपि साधुत्वं कुतो न स्यादत आह॥ प्रयुक्तत्वादिति॥ इष्टान्यविधिरुद्दे
शीति प्रयोगस्य हृदयस्यानुसारेणाव्ययप्रयोक्ते नान्यत्र तत्संभव इत्यर्थः॥ ननु पाशमंत्रस्य करणमंत्रत्वेन प्रतिपा
शमाव वै॥ कथं द्विवचनोह इति केचित्॥ अत्र केचिदाहुः॥ अस्य मंत्रस्य क्रियमाणानुवादित्वात्तेनाभिधान
संभवाद्बहूहापपत्तिरिति॥ अन्ये तु क्रियमाणानुवादिनोऽसमुच्चयस्य द्वादशे वक्ष्यमाणत्वादिहापि प्रकृतौ मंत्रस
मुच्चयापत्तेरग्नाहरणान्तरमनन्वेष्यमित्याहुः॥ तत्रार्थलक्षणन्यायेन बहुवचनान्तोऽविकारेण प्रयोज्य इति शेषः॥
एकस्मिन्नबहुवचनप्रतिघातादर्शनाद्बहूपस्य चैकस्मादविशेषादिति॥ ॥विप्रतिपत्तौ॥ ॥गुणत्वादिति॥
परिच्छेदकतयांगत्वादित्यर्थः॥ वस्तुतः परिच्छेदकापेक्षायाः प्राप्तत्वेनाभावात्पाशकर्मकोन्मोचनक्रियाप्रका
शनमात्रेणात्र दृष्टानसिद्धेर्न संख्याया विवक्षेत्याह॥ अविवक्षिता चेति॥ अवयवेति॥ तथा चोपचारिक इत्यर्थः॥
तत्रार्थलक्षणपाशैकत्वमंत्रगतबहुवचनयोर्विप्रतिपत्तौ विरोधे विकल्प एव नोत्कर्षः॥ पाशोन्मोचनार्थतया
सामान्यात गुणभूतेऽन्यापकल्पनोपचारकल्पनात प्रधानप्रत्यर्थकारकक्रियाणामेकदेशत्वात्तदपे
क्षयाल्पत्वादिति॥ ॥अपरे॥ ॥वचनेहापवादासंगतिः॥ तत्रेति॥ तथा च बहुत्ववचनाविवक्षेति वैयर्थ्यापि

तिभावः ॥ ऊह्यइति यद्यपि प्रयोगाणां व्रीहियववत्प्रयोगवत्समानविध्यान्नमुख्य ऊहस्तथापि पत्नी प्रातिपदिकं
सर्वत्र प्रवर्त्तमानं वचनं त्वेकपत्नीकप्रयोगे समवेतार्थत्वसंभवात्प्राशस्त्यहत्ववच्चाविवक्षितमिमकपत्नीकप्रयोग
मात्र एव प्रवर्त्तते । एवं च द्विबहुपत्नीकप्रयोगे प्रातिपदिकप्रकृत्यादेकवचनस्य च निवृत्तावर्थात् द्विबहुवच
नाक्षेपः केवलप्रकृतिप्रयोगस्य येनाविस्पष्टम् ऊह्य इति पूर्वपक्षाशयः । सिद्धान्तमाह । नैतदिति । ऊहस्तस्य मंत्र
स्य प्रधानभूतस्यैवार्थानुरोधेन सर्वप्रयोगसाधारणस्य त्वयैवोक्तत्वाद्वचनमात्रस्य चैकदेशस्य वि
निर्योगस्यत्वाभावान्निर्देशमात्रार्थत्वेन नमोहइत्यर्थः एकपत्नीकप्रयोगमात्रे गत्वेतु तत्र समवेता
र्थकत्वस्य कार्यद्वारान्यत्रातिदेशाद्ऊहः स्यान्न त्वाम्निद्धविशेषणतोगत्व बोधकाभावात्सर्वेषां समानवि
ध्यादित्याह पत्नी मादिना । निर्देशमात्रार्थसाधुत्वार्थं तासमपि प्रापयितुमर्थः व्यक्तिगतैकत्वपर
त्वस्योऽस्माभिः कल्पनेन ततः परस्मै त्वसमवेतार्थत्वादुक्तार्थत्वपक्षः । ननु सर्वप्रयोगाणां समानविध्यपि व्री
हीणां मेधेति मंत्रस्य पर्यायवत्प्रयोगाश्रावकस्तत्र द्विबहुपत्नीकप्रयोगाश्रावयितरेकवचनानमंत्रस्यस्यादि
तिशंकते । नचेति । तथा च व्रीहिमंत्रे प्रधानप्रातिपदिकार्थस्यासत्वात्किंतु तत्सत्वामिति विधेयस्येति भावः । अत
एवाविवक्षितत्वमपीत्याह । संख्या चेति । सत्रार्थस्तु अपूर्वं प्रकृतावधिकारः अप्रदेशादतिदेशस्य समानविध्ये

मा

नाभावादिति॥ ॥विकृतौ॥ ॥अतिदेशिकीसंगतिः अधिकाशंकामाह आम्नानेति अस्याभिप्रायः आम्नान
स्यनिमित्तत्वात्तस्यच विकृतावसत्वादित्यर्थः सिद्धांतमाह नैवमिति प्रकृतावपगतकार्यस्यविकृतावतिदेशेन
तादृप्यानागमादित्यर्थः ननुप्रकृतावाम्नानासाधुत्वेऽहत्यतदभावात्साकत्वार्थमेवोहः स्यादतआह नचेति एकत्रैव
विमृश्यत्वस्यकल्प्यमानेद्धासत्वे प्रकृतिविकृतिसाधारणमेवकल्प्यतइतिभावः पाशानितिबहुवचनात्तस्यक
र्यं द्वयोरूहइत्याशंक्याह पाशेष्विति सूत्रार्थस्तु विकृतावपिपत्न्यभिधानान्नोहइति॥ ॥अध्रिगुः॥ ॥अत्राप्यति
देशिकीसंगतिः तत्रीयपइति आग्नेयमग्नीषोमीयमानभते ऐन्द्राग्नमुक्थ्ये ऐन्द्रं षोडशिनि सारस्वतीमेषीमतिरात्रेइ
तिसवनीयपशवः स्तेनाचसामान्यविध्येप्रकृतिविकारभावेचक्रमेणान्ह ऊहश्चेति प्रयोगतन्नेकथ्यतइत्यर्थः ऊहश्च
प्रकृत्यइत्येवंरूपः अप्रवृत्तमिति लिंगविशेषनिर्देशाद्दिस्यत्रैवापयादेरूहोत्तिशेषः वचनाल्लिंगस्यवैषम्य
माह नैवमिति अर्थोपपत्तिर्वस्यार्थवोपपत्तिमप्याह अपिचेति सत्वेत्रस्यपाठार्थमस॥ ॥प्रतिनिधौ॥ ॥अत्रापि
सेवसंगतिः मंत्रग्रहणान्तु न्यायत्वादवहननादिसंस्काराणामप्युपलक्षणं उ क्रमेषु इतिशेषः नन्वेचमपि
नीवारगतश्रीघववयवेषु व्रीहित्वेनास्यभावात्कथंव्रीहिशब्दप्रयोगइत्यतआहतेचेति व्रीहिजातेः परिच्छे
दकत्वादवयवद्वारेवसाधनत्वात्प्रयोगसमवेतस्यैवचार्थस्यस्मार्यत्वात् व्रीहिपदेनजातिपरिच्छेदयोग्यावय

वानांस्परस्पराकांक्षेतच्चनीवारगतव्रीह्यवयवानामपि तुल्यमिति भावः सूत्रं स्पष्टार्थम्॥ ॥संसर्गिषु॥ ॥संसर्गित
इति येसंगता एकीभवंति न तु घटादिवत्पृथक्प्रतीयंते अन्नतेजः संभृतय इत्यर्थः परतूपाधिकमिति उपाधिसंख्या
माहायापि विवक्षितत्वसंभवे सर्वथा अविवक्षा नोचितस्यादिति भावः अधिष्ठानादिति गोन्नकरूयादिमित्यर्थः एवं चतत्त्व
तःसिद्धैकत्वविषयत्वोपपत्तौ नोपाधिगतैकत्वविषयत्वं युक्तमिति भावः यद्यप्येतदेकत्वमपि निर्णमाद्युपाधिनि
मित्तं तथापि तद्भूतत्वेन प्रतीयमाने भेदतिरोधायकमन्यन्नु नता दृशापि भस्यैव स्वारसिकत्वमिति तेपः हदरक्का नांस
सर्गिनिमित्तैकत्वासंभवादाह संनिहितानीति यत्नु अधिगुप्रैषस्य संतपनपर्वभावात् संसर्गस्य चोभरकान्तत्वा
देकत्वेनाभिधानानुपपत्तिरिति तदयुक्तं भाविसंतपनफलप्रकाशनस्य प्रैषमंत्रेसत्त्वादनुपपत्तेः सूत्रार्थस्तु
संसर्गिषु चान्नहः अर्थस्य संसर्गिणोऽव्यवच्छेदकत्वादिति परिघाताशब्दस्य परिघापतेपरिच्छिद्यतेर्था
नेनेति योगेन संख्यापरत्वात्॥ ॥एकधेति॥ ॥अनूहापवादसंगतिः तत्र अधिगोः प्रार्थेति अस्यां वेदे पठितत्वा
र्षेमकदुष्वरितएकधाशब्दस्य यश्चोदकत्वादनुग्रहायेत्यर्थः अभिदध्यादिति तथा च सा हि समपि शक्यैव वि
कृतावपि प्रकाश्यत इति नाक्षाशिकादृष्टमप्यभिमगतार्थतेत्यर्थः कार्येति वचः साकल्येनोद्दारारूपकार्या
मेकप्रयत्नसाध्यत्वप्रकाशनमेव कार्यमिति तत्प्रकाशनायाभ्यासएव प्रकृत इत्यर्थः॥सूत्रार्थस्तु एकधेत्यभ्या

सेनाभिधानंस्यात्कुतः एकप्रयत्नेनसहप्रकाश्यप्रकाशकभावादन्यथासर्वविषयत्वासंभवादिति॥ ॥मेध॥ ॥
ऊहातिदेशासंगतिः तत्रैव० अध्रिगुप्रैषस्य ऊहनयतेति अत्रमेधपतिशब्दस्यदेवतापरत्वेयोमेध्याः पवित्रा
स्वविताः मेधस्यपशोः पतिभ्यामग्नीषोमाभ्यां आशासानाः सतोमेधपशुं ऊहोयद्द्वारंचात्वालोत्करमध्य
देशमुपनयतेत्यर्थः यजमानपरत्वेतु यजमानार्थस्त्रीगमाधनेयोमेधः पशुस्तमितिपूर्ववत् आशा
सानाः स्वदक्षिणांयजमानगतफलेवार्थीत् यजमानार्थतयापशोःसिद्धत्वेनाशास्तनायोगात् केचि
द्विति शास्वितामित्यर्थः उपपादनपूर्वकमाद्यपक्षमाह तत्रेति मेधपतित्वरूपशक्यतावच्छेदकैक्या
त्रिपक्ष्येकेवलशक्तिरित्यर्थः अन्यथाप्यविवक्षितार्थोनिगदः पाठोयस्यतथाभूतमित्यर्थः मंत्रयोर्द्विव
चनैकवचनाभ्यामव्यवस्थितार्थत्वमाह तस्मादिति अर्थवत्वस्यान्याप्यत्वादित्यर्थः एकोपायमिति एकदेशा
न्ययात्वेपिप्रसमितायाअबाधितत्वादितिभावः एकस्येति तथाचार्थभेदे मंत्रैक्यानुपपत्तिरित्यर्थः वि
निगमकमाह तत्रेति निराकांक्षमंत्रवाक्यार्थस्यदेवतापरत्वएवोपपत्तेरन्यथामेधपतेरितिवत्कुप्रक्त
त्वाद्युतुर्थ्यसामंजस्यात्सदेवतापरत्वमेवेत्याह सिद्धांतस्त्विति वचनोपपत्तिमाह एवेति एवंचदेवतात्वे परत्वे
कत्वएकवचनांतस्योहः अधिष्ठानबहुत्वेद्विवचनांतस्येत्याहतेनेति अधिष्ठानस्यतेः कर्मानंगत्वेना

नुपयोगेपि तत्तद्धारा देवतास्मृतावुपयोग इति बोध्यं अयं विचारो पशुस्यैवावकस्ये च देवतापैपशुरान्नम्यते सेव
मेक्षपतिरित्येतदपि वाक्यं नाम्ना निरूढत्वाच्चितपतितंत्र दानेदृक्तं सूत्रार्थस्तु मेधपतित्वेस्वामिनो देवतायाः श्रु
शब्दार्थसमवायात्सर्वत्राधिपत्ये पतिशब्दस्य प्रयुक्तत्वादिति शेषस्य षष्ठार्थम्॥ ॥नियमो वा॥ ॥एकत्व
नातो नितर्त्तत इति भाष्यस्यार्थमाह एकोति अस्याप्यतिस्फुटत्वादाह रूपद्धेति सूत्रार्थस्तु अबद्धे देवते निय
मः अन्यत्र विकारः स्यादिप्रकारप्रश्लेषाद्बोध्यः॥ ॥अर्थान्तरे॥ ॥प्रसूदाहरणासंगतिः गतोति तस्यैक
त्वादित्यर्थः देवतात्मनः देवतात्वस्य सूत्रार्थस्तु अर्थान्तरे रूपशुगतो विकारः स्याद्देवतापृथक्त्वात्
एकैकस्मिन्देवतात्वस्य समवायादिति॥ ॥इति श्रीपद्मेश्वरात्मजपारानारीशानन्तराममदृक्सूरिवरात्मज
वैद्यनाथकृतायां शास्त्रदीपिकाव्याख्यायां प्रभाख्यायां नवमस्याध्यायस्य तृतीयः पादः॥ ॥बर्हिश्शति॥
॥ ॥संदिग्धप्रकाश्यरूपद्वारतो येनाधारान्न हेचितनामिह प्रार्थः अतएव कार्यं निरूपणानये भान
सापेक्षस्यानंतर्यमिति शेषः तत्रैवेति अभिगुप्रेषणएवेत्यर्थः वंरूपः पार्श्वद्वयगतास्थीनि अत्र ताश्र
नुष्ठोच्चावयवतादिति शेषं वाक्यं अनुष्ठुप एकप्रपत्ने नोद्धृते त्यर्थः उतबर्हिःशतो एतद्वाक्यस्य पद
स्याप्युपलक्षणतो मम स्येति एकोकं मेमर्थः तत्रेति वाक्ये हि वाक्यार्थप्रधानेन सवात्रवेकिसंख्यापक्ष

संबंधस्य च षड्विंशतिरस्येत्यव्यवहितान्वयात् वक्रीशां तु सामानाधिकरण्याद्धावकाभावरूपसंख्या
विशेषणत्वं एवं च षड्विंशतिपदं बाधापेक्षयाभ्यासस्य च युक्तमिति भावः अयमेवेति अदृष्टार्थतांगीका
रात् द्वितीयस्यानेन संख्याप्राधान्यायोगाद्धि कृतानेकवचनबाधापत्तेश्च तृतीयस्य षष्ठीविरोधात् स्वरूप
रूपस्यातिशयस्यानेन नाशाच्च चतुर्थपक्षस्यायुक्तत्वादिति भावः अकरणेति संतपनपूर्वं कालीनतया पूर्व
स्यतंत्रस्य दुरत्वाकरणत्वायोगादिति भावः प्राधान्येनेति साकल्येनोद्धरणरूपप्रयोजनवत्वादित्यर्थः ते
नेति इत्यमनेन तन्त्र इति शेषः नान्विति सामानाधिकरण्याभावेन प्रथमायाअयुक्तत्वादिति भावः आद्य
स्याधिकरणान्वयेन विंशत्यादीनामपि संख्यामात्रवाचित्वात् संख्येयपरत्वं गौणं वेति ममापि वक्रीशादेस
तुन्ययात्रयपथेति षष्ठ्यंतत्वेनाप्राधान्यमाशंक्याह तस्मादिति षष्ठ्यंतानि विधेयत्वाविहितत्वेन तस्य
यमंत्रप्रकारस्य तत्प्राधान्यमित्यर्थः पदेनेति तन्त्रसंख्याविशिष्टतयेत्यर्थः अस्यपद्यभ्यासे हि तत्रयशो
षड्विंशतिसंख्याप्रवृत्ति संबंधात्तद्विशिष्टतया विधानसिद्धिरिति भावः श्लोके व्याचष्टे वक्त्र्यात्रेति प्रतिपाद
कार्थप्रधानप्रथमांततया वाच्यमितः प्राधान्यमस्यैवेव अन्यथा वदाननं संख्यार्थतया चार्थतापि षड्विंशतिरा
कोपि स्वार्थविशिष्टवृत्तिप्रकाशनार्थ एव हरितौरीति वदिति भावः इयत्तयेत्यनेनेयत्ताप्रकारयतिश्लोकेनेयत्ता

३।

प्राधान्येनप्रकाश्यत्वमर्थः किंतुवंकोविशेषणात्तयेत्युक्तं पञ्चपशुश्चोदितत्वात्प्रधानमित्युक्तंतत्परिहरति
पशुपतीति तथाचपशोरपिहविःसंपादकतया हविरेवप्रधानमिति भावः च्छागमङ्गमस्यच्छागमइतिशे
षः उत्तरार्धं व्याचष्टे तथाचेति तमितीति एतच्च पशुसंख्यासंबंधपक्षेपितुल्यमितितये अभ्यासएव
वेति अप्राकृतपदेनापेक्षयाप्राकृतपदार्थमात्रमेवयुक्तमित्यर्थः एकधास्यत्वचं कृणुतादिति द्विर्ब
हुनामित्याम्नानायनवचनं तथाचषड्विंशतिः षड्विंशतिरनयोरेषां वावंक्रपइति वाच्यमित्यर्थः अयंच
षड्वः पक्षइतिपशुगणनताप्रसक्तचिता तुट्टेरणाभेदस्यप्रकृतावेवाविवक्षणात्समस्यवचनाच्चतदेवन्या
य्यमितिनैमित्यापिप्रायमाहसह्यति सत्रार्थेत्वतः षड्विंशतिरावृत्त्यायासेनपशुगणोपुपुस्येतेतिशेषः गुणा
स्याभ्यासस्यतप्रकृतिवत्षड्विंशतिशब्दप्रकृतिकत्वानत्तोस्वतभेदाभावाद्यपर्थः कुतोभ्यासतत्राहप्राविष
त्वाद्यतिपशुमित्वात्अविकारे हि तासांनेकीणां अप्रकाशकत्वेनसंबंधः प्रकाशितः स्यात्समासत्क्वविक
रात्प्राकृतपदत्वेनवाधरूपावृत्तस्यात्सर्वाभिः समस्योक्ता[illegible]पशोरसंबंधाद्वेति॥ ॥अभ्यासस्य॥ ॥नूपरः
च्छागहीनमगोमवपइतियातिकागोच्छागः तत्रेति भाष्ये किमयमस्य वैशेषिकीसगवः तूपरगोमगयोः स
मासः इतनेववैशेषिकीक्रक्रकिंतुप्राकृतएवाभिगुः षड्विंशतिशब्दवान्ध्वे इतरयोस्तुसमासेन अथ

वासर्वेषामेवसमासेनेति सूत्रमुपन्यस्याद्यपूर्वपक्षसूत्रमिदम् । परं च द्वितीयपूर्वपक्षसूत्रं व्याख्याय सर्वे
षां समास इति सूत्रांतरेणोक्तिस्वातंत्र्यकथनादित्यर्थः अत्र च सर्वेषामेवेत्येवकारो गवाधस्यापुत्र लाघवस्वरसोद्भा
नित्कमततमाह वार्त्तिककारस्त्विति प्राप्तिदीपनविचारे विनेत्यतत्र विकल्पातरत्वेन वेति निषेधार्थत्वाको
वातिनेत्यबाधितमित्यर्थः गिरापदस्थानापन्नोमानमाह नस्मिन्निति अन्यथा प्रतिषेधस्याप्राप्तत्वेन तस्या
पि विधेर्वाक्यभेदः स्यादिति भावः पूर्वतेवैषम्यमाह न वेवमिति षड्विंशतिरित्यस्य एवकारार्थविशेष
णात्तथाविधस्य च प्रयोगाभावान्नभूतेवकारार्थस्य चायोगान्व्ययोगव्यावृत्तिरूपार्थस्य देहेनाविधानादिति
न च तुरिन्द्रादित्येव प्रतिषेधविधायकं इतरदनुवाद इत्यर्थः गिरापदेतन्नापेपूर्वकार इत्याह नन्विति आनु
पातिकस्य उर्वन्तत्वाकार्येतेन प्रत्ययस्य विहितस्य विकल्प इत्यत आह अगीकृत इति उपनीयमानात्तदो
र्वन्त्यामिति भावः सूत्रार्थं तत्स्यष्ट ॥ ॥ तद्धतिथिष्य ॥ ॥ विकल्पस्याक्षिप्य समाधानासंगतिः किमिति
षड्विंशतिपदद्युत्क्ते शेषिके कर्तव्यमित्यर्थः अपप्रायार्थमिति अश्ववर्त्कौरणां चतुस्त्रिंशत्त्वाद्देनान्यापेन
वाचनिकेनेत षड्विंशतिपदेन लणाया चतुस्त्रिंशदभिधानमित्यर्थः गिरापदेनादित्यनेन प्रतिषेधस्यान
वादत्वं स्याद्वितं नत्वपमिति अत्र चोन्नक्षणगम्यत्वात्तत्र चपानाभावादिति भावः चतुस्त्रिंशात्रिष

ते। ननु षड्विंशतिरित्यस्यानुवादत्वाभावे विधिरेवास्त्विति शंकामपाकुर्वन् श्लोकं व्याचष्टे नचतुरिति। एवकारा
र्थं विशेषणमाह इति। षड्विंशतिपदमिति शेषः ततस्त्वयं द्व्याद्येतिविधिनानयपोग्यं नेत्यर्थः एवकारार्थश्चेति। सा च
न चतुस्त्रिंशदिति निषेधेन प्राप्तत्वादनूद्यत इति शेषः। विधीयत इत्यनंतरं न चतुस्त्रिंशदित्यनेनेति शेषः। पथ्या
श्क्ते एवकारार्थविधेरंगीकारे पूर्वाधिकरणोक्तस्य न चतुस्त्रिंशदित्येव प्रतिषेधं विधत्त इत्यस्य व्याघातापत्ते
ः। अत्रोक्तस्य चतुस्त्रिंशत्प्रतिषेधांशिनः पदप्रतिषेधवदनूद्यते त्यस्य न त्वत्रेत्यादिना व्यतिरेकप्रतिपादनास्या
मंजस्यापत्तेरिति ध्येयम्। ननु न चतुस्त्रिंशदिति पदमात्रनिर्देशात्कथमप्रतिषेधस्तत्राह। शक्नोतिचेति। प्रती
कग्रहणेन आश्विषप्रतीकग्रहणेन। इति करणस्यापार्थकत्वादिति भावः। ग्रहणं नाकुग्रहणं। अश्वेदस्य
त्रष्ठेद अश्विगुववचनमिति। षड्विंशतिपदे नानुवादत्वं वनपूर्वमस्तिमंत्रनक्षणेत्यर्थः तदुक्तं यथाप्राप्तमि
ति। सूत्रार्थस्तु। वैदेशिकं वचनं प्रतिषिध्य प्रकृतिस्तत्र तमंत्रो निगद्यते माच प्रकृतिः पक्षे चतुस्त्रिंश
दिति वैशेषिकं च। कुतः तस्यापि प्रकरणपाठे नावश्यकत्वादिति॥ ॥वनिष्ठु॥ ॥उरूकशब्दे ऽन्तस्याक्षि
प्यस्यमर्थनासंगतिः वनिष्ठुर्वपासदृशास्तसन्निहितावयवविशेषस्तमारविष्टतन्नवनेपाकुरुततत्रोरु
कबुद्धिं कुर्वाणा इत्यर्थः। प्रतिषिध्यत इति। प्रतिषेधविषयत्वेन प्रकाश्यत इत्यर्थः तेन च प्रतिषेधकल्प

नानत्वप्रकारान्तस्य दृष्टान्तार्थत्वे बोध्यं· च निष्ठुनवन प्रतिषेधार्थो यं पत्रैः सादृश्यबुद्धिनिषेधार्थो वा· नाह
इत्याहनतावदिति· नहि तावत्वं च वनिष्ठु नाघनी चाव घतीति किं प्राप्यनादि ववनादिति भावः द्वितीयं दृष्ट
पातिसादृश्येति· अदृष्टार्थत्वादित्यनेन तरपसोमलइति शेषः दर्शितेति· उरुविस्तारां कुम्भे दोवयाहयामित्ये
वेतुपत्वमर्थः प्रयोजनमाह तस्मादिति· उरुशाके इत्यादिरूपः एकपदत्वे कुरुके इति शेषः सत्रार्थत्वस्य
घः॥ ॥प्रशाखा॥ ॥आतिदेशिकी संगतिः वक्ष्यः कुरणुतादित्यत्र संकुरणुतादित्यनुषङ्गपठिते· प्रसिद्धत्वा
दिति· शस्त्र हिंसायामिति धात्वनुसारादिति भावः सिद्धान्तमाह नेति· स्वधितिनापरशुनिशालातिश्रवणादि
त्यर्थः अस्मिन् पक्षे कुरणुतादित्यस्य कुरुतादिमर्थो तेषः सत्रे स्पष्टमशेषमशाखाकाः॥ ॥आतिदेशिकस्य व
संगतिः बदनेनेति· सादृश्यप्रतिपादनेनावैकन्यपेवविवक्षितं दृष्टार्थत्वादित्यर्थः एवमिति· शाखा· शाखा
काकाले दोषराशीपुत्तो· कश्यपेकछपाकारावं सौकवपाकवादृसदृशौ रत्नहासदृशौ वा· अष्टीवंतौ अवीः
पूर्वभागौ स्वेकपर्णी· करवीरपत्रसदृशौ· शुकपत्रसदृशौ वेति पदार्थो तेयाः सत्रे प्रसिद्धार्थोशयनादि
पदस्यापानाधिकरण्यादिति हेत्वर्थः शेषं सुगमं॥ ॥प्रासंगिके॥ ॥पत्रपदानां तरकार्यप्रसंगादिष्टिका
पर्विनासंगतिः उद्धृत इति· गार्हपत्या उद्धृतमप्रणीत इत्यर्थः उखायतनं शयनं किंचिदिति· हे नहे नुमनो

लिङादिस्वनुशासनादिस्वर्थः क्रमः एकपदरूपया वाक्येन पदितस्यां तस्या पोति वद्विशेषणप्राधान्यक
ल्पनया। तस्मात् क्रतिबन्धीपसत्वेनोद्धानस्य निमित्तत्वात् एतदेवोपपादयति यदा हीति। अथ यथार्थः हेतु
हेतुमतोरिमनेन प्रयोजनत्वरूपनिमित्तत्वे यदिशानीन प्रं स्यात् हि दध्युपसिचेदिति तदत्र प्रतिपा
दयितुं यदिशाक्येन नदासनिमित्तोपकारितास्यान्न सेवत्र तत्संभवः उद्धानस्य प्रयोजनत्वासंभवादम्निन
तद्विशेषणत्वेन ताहशानिमित्तत्वान्वयायोग्यत्वात् एवं चानुष्ठापकत्वरूपमेव निमित्तत्वं वाच्यमित्याशयादुप
कारित्वमित्ति। नन्वारादुपकारित्वेपि भेदेन होमस्य प्रकृत भेदेनस्य च विधानं वदिष्टरपि अग्निहोत्रार्थोदुनाभि
नाश एव विधानेस्यादत आह निमित्तस्य चेति भेदेन होमे।हेदर्शवैगुण्यपरिहारार्थं तयादध्नां गं न चान्यदोष
भेदेने विधीयमानस्य तदंगत्वे संभवतीमनन्यगत्याफलो नैमित्तकन्यन्नापरिहारायतत्र प्राकरणिकत्वेनानि
मित्तस्य विशेषणत्वं कृतं उक्तदर्शार्थमप्युक्त तस्याग्निहोत्र कालेनोद्धानमग्निहोत्र वैगुण्यतापादकमेवेति तत्स
माधानार्थं तयोष्टरग्निहोत्रांगत्वसंभवान्नाग्निहोत्रार्थोद्धृतत्वस्य निमित्तविशेषणता। वाक्यभेदापत्तेरिति भाव
वन्नन्तस्कन्नदस्याग्नेस्स्यादकाकांक्षापामिषेत्तदुमादकनया सन्निपत्योपकारित्वेपि दर्शार्थोद्धृतस्याप्यग्नेरग्नि
होत्रोपयोगित्वेन तदुमादनार्थमिषेः करणासंभवाज्ञेयः उद्धानस्यं नि। स्वाधिकारिकप्रयोगागमस्याग्नेरेकदेश

संबंधमात्रेणोत्पन्नविशेषणत्वेनार्थकल्पेन वा । आद्ये दोषमाह । निष्क्रम्यत्वादिति । द्वितीये तु तादृशानाशस्यानिमन्त्रे
ष्यग्रेस्तत्राप्यभावेन विशेषणत्वप्रवृत्तेः । विशेष्यव्यापि चोदना इति न्यायात् न विशेषणत्वं युक्तमित्याह । न
चेति । पूर्वार्द्धं व्याचष्टे । अग्नीति । इतरार्द्धं व्याचष्टे । नचेति । वर्तमानस्येति । प्रतियोगिन एव । तस्मादुत्पन्नविशिष्ट-
स्य कर्मण्यग्निहोत्रप्रयोगाङ्गभूतोग्निरेव निमित्तमित्याह । उत्पन्नेति । परितस्य युक्तस्य । ननु दर्शाद्यर्थमुद्धृतस्याप्यग्नेर
ग्निहोत्राङ्गत्वात्तदुत्पादकत्वेनेष्टेरग्निहोत्राङ्गत्वं स्यादत आह । अग्निहोत्रार्थं चेति । उद्धृतत्वरूपेणोपकार्यत्वादगम्याद्य-
स्योद्धृतत्वेनाग्निहोत्राङ्गत्वे तदुत्पादकतयेष्टेरग्निहोत्राङ्गत्वं । प्रकृते तदुद्धरणस्याग्निहोत्राङ्गत्वान्न तदुपयोगस्तदुत्प-
दकतयाङ्गत्वसंभव इत्यर्थः । सूत्रं स्पष्टार्थम् ॥ ॥ आरणो वा ॥ ॥ आतिदेशिकी संगतिः । गतश्रीः । सर्वान्तस्यमस्य समु
दायार्थत्वमुपपादयति । प्रत्येकमिति । सिद्धान्तमाह । नैवमिति । तत्र । गतश्रीत्वं उद्धृतो वाग्निरिति । तथाचोद्धृतत्वेना
ग्निहोत्राङ्गत्वात् पूर्वोक्तन्यायेन नेष्टिरिति भावः । तत्कृतः । प्रकरणाद्यभावादाह । तच्छ्रिय इति षष्ठी । अस्यापुरुषार्थ
येतदं निमित्तविधायकत्वमिति न धारणो कर्तव्यार्थमिति सूचयितुं निमित्तवशादित्युक्तं । न कर्मार्थत्वेप्यर्थः । एवं च
प्रसंगोपकारित्वादग्नेर्नेष्टिस्तस्मात्ताद्रूप्याभावादिति भावः । ॥ सूत्रं स्पष्टम् ॥ ॥ नत्वपवित्रे ॥ ॥ आतिदेशिकोवसं
गतिः । विशेषाशंकामाह । तत्रेति । ननु संगत्योद्धरणस्य कालान्वयात्तं विना कथं प्रवृत्तमत आह । गुणत्वेन

शा॰ दी॰
३८

34

ति॰ गुणानुरोधेन प्रधानलोपोनुचित इत्यर्थः कालेइति॰ कालस्यानुपादेयत्वेनाधिकारिविशेषणत्वात्तदभावे
वाधिकाराभावादुद्देशमात्रेणोद्देश्यत्वस्यापि होत्रागमयोरनुष्ठानायोगात्तन्मंत्रकर्त्तव्यतेत्यर्थः प्रसंगसिद्धेः श्र
नप्रत्यायनलोपप्रयुक्तदोषइतिभावः सूत्रार्थमुक्त्वा परार्थो मन्त्रेवस्याग्निहोत्रस्यानुष्ठानं तेन ताप्राप्तकालत्वा
न्नमंत्रइति॥ ॥प्रदान॥ ॥ मंत्रवद्धर्माभावो नेत्यातिदेशिकी संगतिः चारो इति॰ विरुद्धत्रिकद्रव्यमपि द्रव्यभावना
या अश्रवणात्तद्द्रव्यदेवताच्चयेचपयसीतिकारकान्वयायोगात्कल्प्यमानेपि चतद्द्रव्यभावाच्च रुदादिमत्का
र्यः स च पयसीतिवाक्यभेदइत्यर्थः सप्तम्यर्थइति॰ संप्रतिपन्नदेवतत्वात्स्वरूपप्रदानवस्त्वहे अपरामप्यर्थोसि
द्धेः चरुत्वाविरोधादिमाशयः द्रव्यदेवतसंबंधइति॰ द्रव्यदेवतेसंबध्ये तेअनेनेतितथा भूताभावनेत्यर्थः अप्र
मत्वेनविधिवत्भावनायाअप्यनुपकल्पनीयत्वादितिभावः सूत्रार्थमुक्त्वा प्रयमारोपयति प्रदानदर्श
नेप्रतत्स्वतद्धर्मः तस्य प्रदेयस्य धर्मोयस्मिंस्तथा भूतं भोजनार्थत्वाद्याग्यार्थत्वान्यथदेकवत्संसर्गात्तविते
षिवदिति॥ ॥अभ्युदये॥ ॥ अत्रप्रत्युदाहरणसंगतिः अन्यत्सुगमं सूत्रार्थमुक्त्वा अभ्युदयेदोहापनयः अ
पनीतदेवतादोहः इध्मिपयोरूपः प्रदेयधर्मोस्यात्प्रदेयत्वेनप्रकृतत्वादितिअपनयोवा॥ ॥पूर्वापवादासं
गतिः तत्रेति॰ पइतिप्रकृताभिधायकयच्छब्दवशात्प्रकृतानामेवदेवतानांतरसंबंधप्रतीतेरितिभावः अपवैति॰

राम
३८

पूर्वदेवतापनयविध्यभावेन देवतांतरसंबंधार्थत्वासंभवात्कर्मांतरत्वसिद्धेः प्रहाणप्राप्त्यभावेऽसामर्थ्यः प्रयासि
च हरिरिति वदितिसूत्रार्थः ॥ ॥ अपशूनां ॥ ॥ आतिदेशिकीसंगतिः अधिकाशंकामाह एवं हीति सिद्धांतमा
ह द्वितीयेति पूर्वयात्रशेषन्यायेन द्वितीयाद्विंदेऽकृतिभंगस्य सोमेन यजेत समस्तो निरपेक्षसाक्षन त्वस्य प्रती
यस्य तिरोधानाद्दुर्बलप्रकरणे नांगत्वायोगाच्चायुक्त इति भावः सूत्रे अपूर्वत्वादिसस्यापूर्वार्थत्वापत्तेरसमर्थः
॥ ॥ पर्यग्नि ॥ ॥ पयआदीनामिव परस्तात्प्रावित्यप्रदेश्यत्वमिति शंकोत्थानात् संगतिः परस्त्वच्छंदेऽप्यारराप
कमगविशेषवचनइति माधवः आनंत्येति स्पर्शमात्रमित्यर्थः एवं च यागाभावेनातिदेशाभावात्पर्यग्निक
रणमपि विधेयमित्यर्थः यागः कुतो नाविधीयते तत्राह यागेति विधिये तत्त्वइति आनंतर्यं अव्यवहितोत्तर
त्वं शेषस्य गमं सूत्रार्थस्तु पर्यग्निकृतानामुत्सर्गतादर्थ्यतद्विषयोपपत्तेः प्रमाणाच्चार्थतां चरत्पदप्रातीप
प्रधानवत्तन्न तु यागविधिरिति ॥ ॥ अर्त्य ॥ ॥ आक्षिप्य समाधानात् संगतिः शेषसंस्कारप्रपत्तिशब्दानु
पपत्तेरितिपदं कृतद्विवशोति कर्मांतरस्य हीति शेषसंस्कारशब्दयोरुपपत्तिमाह शेषसंस्कारशब्दौ च
ति तथा चैतेरीतिषारात्वेन तावत्कर्तव्यमात्रमिति भावः संक्षेपेणाध्यायार्थमुपसंहरति प्राकृतस्याग्नेयो
र्थः प्रयोजनं तत्र पतितत्संस्कारनापन्नान्यः स्वर्पतत्त्वदूपपत्त्यकारापतया कार्यं तद्देशादिसमर्थः एवं च अन्यतरका

पं संस्कार्यमित्यापद्यमिति सामान्यविषये पोक्षं । एवं नीवारादिकार्यं वै तु ष्यरूपेण तद्दशादितिसं
स्कृतैपोजनेति शिवम् ॥ ॥ इति श्रीमत्सदैतावयप्रमाराध्य श्रीमन्तन्त्र [illegible] भद्दान्मनवैघनापक्ष
तायां शास्त्रदीपिका व्याख्यायां प्रभाख्यायां नवमाध्यायः संपूर्णः ॥ छ ॥ ॥ ॥ ॥ ॥ ॥ ॥